मूर्छा जाते ऽत्य् अर्थो डलयोर् अभेदात् । कीदृशं नलम् । स्वीयं यशः पास्यन्तं रक्षन्तम् । अनिजकम् अस्वकीयम् महस् तेजः प्रभुत्वम् अपास्यन्तम् अरक्षन्तम् । यद्वा । निजकं स्वकीयम् महस् तेजः आपास्यन्तं दूरतः प्रसारयन्तम् इत्य् अर्थः । एवं शत्रुकलापास्यन्तं शत्रूणां कलापाः समूहास् तान् अस्यति क्षिपती ऽति सः तम् । अथवा अस्यन्तः असिना अन्तो यस्य एतादृशः शत्रुकलापो यस्य । एवं कलापास्यं कलाम् पाती ऽति कलापश् चन्द्रस् तत्सदृशमुखम् । कलापो भूषणे बर्हे तूणीरे संहते ऽपि चे ऽत्य् अमरः ॥३५॥

स्वर् इति । शक्र इन्द्रस् तं नलम् प्रोचे उवाच । नाम सम्भावनायाम् । तं कं । यम् अनलङ्कृतम् अप्य् अलङ्काररहितम् अपि नलं स्वर्निलयानां देवानां ततिः श्रेणिः श्रिया शोभया जेतुं तिरस्कर्तुम् अनलम् न अलं समर्था । किम्भूतं नलं । अजेयानाम् अन्यैर् जेतुम् अशक्यानाम् अरिचयानां शत्रुयूथानाम् अनलम् अग्निं दाहकत्वात् ॥३६॥

वदे ऽति । हे नल त्वं तस्यै भैम्यै नो ऽस्माकं कामायासं कामेन कृतो य आयासस् तं वद त्वत्कृते देवान् कामः पीडयती ऽति भावः । तस्यै कस्यै । यद्गुणाः यस्या गुणा नो ऽस्माकं श्रमाय खेदाय आसन् अभूवन् शमाये ऽति पाठे शान्त्यै इत्य् अर्थः । अथ च या श्रेष्ठतमा अत्यन्तम् उत्कृष्टा । तु पुनस् तत्रे ऽत्य् अर्थात् आसन्नो जनो द्वारपालकादिस् त्वां न दृष्टा न द्रक्ष्यति । कीदृशस् त्वम् । स्वमायासन्नः स्वस्य तव मत्प्रसादजन्या या माया कपटः तया ऽऽसन्न आछन्नः ॥३७॥

इती ऽति । सुरप्रवेके सुरे श्रेष्ठे इन्द्रे इति उक्तप्रकारेण सरवे सशब्दे सति इन्द्रे एवम् उक्तवति सती ऽत्य् अर्थः के मस्तके हास्तं हस्तसम्बन्धिमुकुलं न्यस्य

हरिपवमानयमानां दूतो ऽस्मि नलो महारमानयमानान् ।
भवतीम् मानयमानान् भैमि सुरान् विद्धि महम् इमान् अयमानान् ॥३९॥
तुल्ये ऽप्सरसा देहिप्रभवो मग्नाः स्मरप्रसरसादे हि ।
तान् अभिसर सा देहि स्रजं च नाकात् सुखं च सरसाद् एहि ॥४०॥
इति कृतसामारवतः सुरलोकात् तन्मुखेन सा मारवतः ।
न रिरंसाम् आर बत स्थलाद् इव नलोत्कमानसा मारवतः ॥४१॥

मस्तके ऽञ्जलिं कृत्वा स नलः तां दमयन्तीम् अभ्यस्त जगाम । कीदृशः सः । अविवेकेहास्तः अविवेकस्या ऽज्ञानविशेषस्य या ईहा चेष्टा तया अस्तः रहितः । यद्वा नलं दृष्टवती दमयन्ती ना ऽन्यं वरिष्यती ऽति इन्द्रस्य यो ऽविवेकस् तज्जनितया चेष्टया अस्तः प्रेषित इत्य् अर्थः । पार्थिवे नले अयति गतवति सति का स्त्री इह स्थले आस्त अतिष्ठत् न का ऽपी ऽत्य् अर्थः ॥३८॥

हरी ऽति । हरिर् इन्द्रो ऽग्निश् च पवमानो वरुणो वायुश् च यमः कृतान्तस् तेषां दूतो नलनामा ऽहम् अस्मि । इमान् इन्द्रादीन् सुरान् महं तव स्वयंवरम् अयमानान् प्राप्तान् विद्धि जानीहि । कीदृशान् । महारमानयमानान् रमा लक्ष्मीः नयो नीतिः मानश् चित्तसमुन्नतिः महान्तो रमानयमाना येषां ते तान् । एवम् भवतीं त्वाम् मानयमानान् स्वीकुर्वतः ॥३९॥

तुल्य इति । हे अप्सरसा तुल्ये रम्भादिसदृशे देहिप्रभवो मनुष्यादीनाम् ईश्वरा देवाः स्मरप्रसरसादे स्मरस्य यः प्रसरः प्रसारस् तज्जन्ये सादे दुःखे मग्नाः हि यतः । अतः सा त्वं तान् देवान् अभिसर स्वीकुरु । च पुनः स्रजम् मालां देहि । सरसाद् अमृतादियुक्तात् नाकात् स्वर्गात् सुखम् एहि प्राप्नुहि ॥४०॥

इती ऽति । सा भैमी सुरलोकाद् इन्द्रादिदेवगणात् । रिरंसां रन्तुम् इच्छां क्रीडां न आर न प्राप । किम्भूतात् । तन्मुखेन नलमुखेन इति पूर्वोक्तन्यायेन कृतसामारवतः कृतः सामस्य सान्त्वनायाः आरवः शब्दो येन ततः । एवम् मारवतः मारो मदनस् तद्वतः । बत खेदे । कीदृशी सा । नलोत्कमानसा नले उत्कम् उत्कण्ठितम् मानसं चेतो यस्याः सा । कस्माद् इव । मारवतः स्थलाद् इव । मरोर् इदम् मारवं तादृशात् स्थलाद् इव मरुसम्बन्धिदेशाद् इव । यथा ऽहं सः नलो ऽत्कमानसः नले जलोत्पन्नपदार्थे बिसे उत्कण्ठितचित्तो

सा विरराजा ऽऽयतया वीक्ष्य दृशा तं स्मरातुरा ऽजायत या ।
स्थितिर् अत्रा ऽजायतया द्युसदां चा ऽभापि निषधराजाय तया ॥४२॥
तस्या देवाग्र्यस्य प्रणम्य च नलेन धीः पदे ऽवाप्य् अस्य ।
सति निनदे वाद्यस्य स्वयम्प्रियायाः पदम् मुदे ऽवाद् यस्य ॥४३॥
अथ तरसा रङ्गे ऽयं नृपतिगणो ऽस्थित पदेषु सारं गेयम् ।
चञ्चलसारङ्गे ऽयन् दमयन्ती चा ऽतितुलितसारङ्गे ऽयम् ॥४४॥

मत्सम्भृतवस्तुतो रिंसां ना ऽऽप्नोति । यद्वा । कृतसामे ऽति दमयन्त्या विशेषणं कृतं साम सान्त्वनं यया सा । आरवतः शब्दं कुर्वत इति सुरलोकविशेषणम् ॥४१॥

से ऽति । सा भैमी विरराज विशेषेण शुशुभे । सा का । या आयतया विशालया दृशा दृष्ट्या अत्र भवने तं नलं वीक्ष्य दृष्ट्वा स्मरातुरा कामव्याप्ता ऽजायत अभूत् । च अपरं तया भैम्या निषधराजाय नलाय द्युसदां दिवि सीदन्ती ऽति द्युसदो देवास् तेषां स्थितिः स्थानम् अजायतया जायायाः भावो जायता न जायता ऽजायता तया ऽभापि अवादि । स्त्रीत्वेन देवान् न वृतवती ऽति भावः ॥४२॥

तस्या इति । नलेना ऽस्य देवाग्र्यस्य सुरमुख्यस्ये ऽन्द्रस्य पदे चरणे प्रणम्या ऽभिवाद्य तस्याः भैम्याः धीर् बुद्धिर् अवादि उक्ता । कस्मिन् सति । वाद्यस्य तूर्यादेर् निनदे शब्दे सति । यस्य नलस्य मुदे आनन्दाय प्रियायाः पदं वाक्यम् अवात् प्राप । यद्वा । अस्य कस्ये ऽन्द्रस्य मुदे हर्षाय प्रियायाः पदं स्थानम् अवाज् जगाम नल इति शेषः । भैमी त्वां न वृणुत इत्य् उक्तवान् इति भावः ॥४३॥

अथे ऽति । अथा ऽनन्तरम् अयं नृपतिगणो राजलोको रङ्गे स्वयंवरसभायां तरसा वेगेन पदेषु भीमकल्पितमञ्चस्थानेषु अस्थित आसीत । नृपतिगणः पदान्य् अकृत इति पाठे पदानि चरणविन्यासान् अकृत अकरोद् इत्य् अर्थः । किं कुर्वन् । सारम् उत्कृष्टं गेयम् अयन् गीतं शृण्वन् इति भावः गत्यर्था ज्ञानार्थाः । कीदृशे रङ्गे । चञ्चलसारङ्गे सौरभ्याधिक्येन चञ्चलाः सारङ्गा भ्रमरा यत्र तादृशे यद्वा चञ्चलसारङ्गे खेलत्पक्षिविशेषे इत्य् अर्थः । यद्वा चञ्चला गमना-

व्यधुर् अवनामान् येषु प्रजा नृपेषु अथ निवेद्य नामान्य् एषु ।
सूतैर् नामा ऽन्येषु प्रकीर्त्यमानेषु शोभना मान्येषु ॥४५॥
सा ऽङ्गेन नलसमानान् अनलसमानान् अमुत्र कतिचित् पुरुषान् ।
प्रैक्षत न न लसमानान् अनलसमानान् अभून् न तेषाम् भेदः ॥४६॥
रुचिकृतनासत्यागाः स्फुरतु नलो यदि च वच्मि ना ऽसत्या गाः ।
अपि दीना सत्य् आगां न्याययुतेने ऽव वर्त्मना सत्यागा ॥४७॥

गमनशीलाः सारङ्गा गजा यस्मिन् तस्मिन्न् इत्य् अर्थः । च पुनर् इयं दमयन्ती स्वोचितपदेषु अस्थित इति पूर्वेणा ऽन्वयः । कीदृशी ऽयम् । अक्षितुलितसारङ्गा अक्षिभ्यां तुलितः सारङ्गो मृगो यया सा । सारङ्गश् चातके भृङ्गे कुरङ्गे च मतङ्गजे इत्य् अमरः ॥४४॥

व्यधुर् इति । सा ऽङ्ग इति । युग्मम् । अथ एषु नृपेषु राजसु नामानि निवेद्य उक्त्वा सूतैर् मागधैः प्रकीर्त्यमानेषु स्तूयमानेषु वन्दिभिः कृतपरिचयेषु सत्सु । तथा नाम सम्भावनायाम् । अन्येषु मान्येषु देवेषु प्रकीर्त्यमानेषु सत्सु । एषु केषु । येषु नृपेषु प्रजास् तत्रत्या जना अवनामान् नमस्कारान् व्यधुश् चक्रुः । सा शोभना भव्या भैमी अमुत्र स्वयंवरे कतिचित् पुरुषान् न प्रैक्षत इति न किं तु ददर्श । कीदृशान् । अनलसमानान् अग्नितुल्यान् । एवं लसमानान् देदीप्यमानान् । एवम् अनलसमानान् न अलसमाना अनलसमानास् तान् । अङ्गेन शरीरेण नलसमानान् नलेन सदृशान् यतस् तेषां नलसमानाम् पुरुषाणाम् इन्द्रादीनाम् भेदो विविच्यज्ञानं ना ऽभून् न ज्ञातम् ॥४५॥४६॥

रुचो ऽति । च परं यद्य् अहं सती साध्वी यद्य् अहम् । असत्याः गा वाणीः न वच्मि न वदामि । तथा दीना ऽपि यदि न्याययुतेने ऽव वर्त्मना धर्ममार्गेणे ऽव आगां गच्छामि यद्य् अहम् । सत्यागा त्यागेन दानेन सह वर्तमाना तदा नलः स्फुरतु इन्द्रादिभिन्नत्वेन ज्ञानविषयो भवतु । कीदृशो नलः । रुचिकृतनासत्यागाः रुच्या कान्त्या कृतः नासत्ययोर् दस्रयोः आगो ऽपराधो येन दस्राधिकसुन्दर इति यावत् ॥४७॥

यदि वा भावं न्यस्य स्थिता ऽस्मि नल एव नरविभाव् अन्यस्य ।
देवसभावन्यस्य द्विपस्य वपुषो भवेद् विभा वन्यस्य ॥४८॥
कृतभावा साव् अनितान् इति भुवम् ऐक्षत सुरान् सुवासा वनिता ।
स्वपतिं वा सावनिताचिह्नं धार्मिकजने ध्रुवा ऽऽसा ऽवनिता ॥४९॥
स्वरिरंसादे ऽवा ऽल्याकुलया दृष्ट्या ऽर्थिता ऽपि सा देवाल्या ।
वपुषि ससादि बाल्याद् अवृत नलम् उपस्थितं रसाद् एवा ऽऽल्या ॥५०॥

यदि वे ऽति । वा समुच्चये यदि चेत् यदि अन्यस्या ऽन्यस्मिन् पुरुषे भावं चित्ताभिप्रायं न्यस्य त्यक्त्वा । निपूर्वस्या ऽस क्षेपण इत्य् अस्य न्यस्ये ऽति रूपम् । अहं नल एव स्थिता ऽस्मि तिष्ठामि वर्ते । तर्हि अस्य नलस्य वपुषः शरीरस्य विभा कान्तिः अवनीर् अधिका भवेद् भवतु । कीदृशे नले । नरविभौ नराणां विभुर् नरविभुस् तस्मिन् । कीदृशस्य वपुषः देवसभावन्यस्य द्विपस्य । देवानां सभे ऽव वनं तत्रो ऽत्पन्नस्य द्विपस्य हस्तिनः । अन्यो ऽपि द्विपो वन्यो भवति ॥४८॥

कृते ऽति । असौ वनिता भैमी भुवम् भूमिम् अनितान् अप्राप्तान् भूमिस्पर्शरहितान् सुरान् देवान् ऐक्षता ऽपश्यत् । कथम्भूता सा । इत्य् अनेन प्रकारेण कृतभावा कृतो भावश् चित्ताभिप्रायो यया सा । एवं सुवासाः सुष्ठु शोभनं वासो वस्त्रं यस्याः सा । वाशब्दश् चार्थः च पुनः स्वपतिं नलम् ऐक्षत् । कीदृशं स्वपतिम् अवन्या सह वर्तमानः सावनिः तस्य भावः सावनिता सै ऽव चिह्नं यस्य तम् भूमियुक्तपादत्वात् देवभिन्नत्वेन अपश्यद् इत्य् अर्थः । देवानां तु तद्राहित्यं स्वाभाविकम् । तं कम् । यस्य नलस्य अवनिता अवनं रक्षणम् अस्या ऽस्ती ऽत्य् अवनी अवनिनो भावो ऽवनिता रक्षणवत्ता धार्मिकजने साधुनि जने ध्रुवा निश्चिता आस भवति स्म आसे ऽति बभूवार्थे ऽव्ययम् ॥४९॥

स्वे ऽति । सा भैमी आल्या सख्या करणेन रसाद् एव प्रीतेर् एव तं नलम् अवृत अवृणुत । कीदृशं नलम् । उपस्थितं समीपे तिष्ठन्तम् । कस्मिन् सति । बाल्याद् बाल्यम् आरभ्य बाला नवयौवना तस्या भावो बाल्यं तस्मात् बाल्याद् धेतोर्

सत्सदसो माननया रुद्रसमो यः स्वतेजसो ऽमा न न या ।
प्रवृतः सोमाननया नलो बभौ भुवि गुणेन सो ऽमान् अनया ॥५१॥
मददम्भाव् अरम् अस्यञ् ज्ञात्वा ऽथ मनो गुरुप्रभावरमस्य ।
सुरवृषभा वरम् अस्य प्रदिश्य जग्मुर् गतप्रभावरमस्य ॥५२॥
गुरुमहिमा परमायास्तम्भी नल एष वसतिम् आप रमायाः ।
प्रियया ऽमा परमायाः स्वपुरम् अगुरु यत्र तं क्षमापरम् आयाः ॥५३॥

वा वपुषि सखेदे सति सखेदे सति । कीदृशी सा । देवाल्या देवपङ्क्त्या अर्थिता ऽपि याचिता ऽपि । एवं दृष्ट्या दृशा स्वरिरंसादा इव स्वस्य रिरंसा रन्तुम् इच्छा तां ददाती ऽति स्वक्रीडाप्रदा इव । कीदृशा दृष्ट्या । अल्याकुलया भ्रमर इव चञ्चलया ॥५०॥

सद् इति । स नलो बभौ शुशुभे । कीदृशः । अनया सोमाननया चन्द्रवदनया भैम्या प्रवृतः पतित्वेन स्वीकृतः । स कः । यः सत्सदसः सतां देवानां साधूनां वा यत्सदः सभा तस्याः या मानना तया रुद्रसमः शिवसदृशः रुद्रांशत्वात् । अनया कया । स्वतेजसा पातिव्रत्येन उमा ने ऽति न किं तु ऽमे ऽव एतेन शिवपार्वतीयोगो ऽपि वर्णितः । कीदृशो नलः । गुणेन शौर्यादिना भुवि पृथिव्याम् अमान् न माती ऽत्य् अमान् अधिकगुण इत्य् अर्थः ॥५१॥

मदे ऽति । अथ सुरवृषभा देवश्रेष्ठा इन्द्रादयो ऽस्य नलस्य वरम् प्रदिश्य दत्वा जग्मुर् ययुः । वरदाने हेतुम् आह अस्य नलस्य मनश् चित्तं मददम्भौ मदश् च दम्भश् च तौ अरं झटिति अस्यत् त्यजत् ज्ञात्वा । कीदृशस्या ऽस्य गुरुप्रभावरमस्य । प्रभावश् च रमा च प्रभावरमे गुर्व्यौ प्रभावरमे यस्य तस्य । यद्वा । गुर्व्या प्रभावेन रमा लक्ष्मीर् यस्य । एवं गतप्रभावरमस्य । गतो नष्टः प्रभायाः कान्तेर् अवरमो ऽशोभनत्वं यस्मात् सः तस्या ऽतिशयितकान्तेर् इत्य् अर्थः ॥५२॥

गुर्व् इति । एष नलः प्रियया भैम्या अमा सह तत् स्वपुरं स्वनगरम् आप प्राप । स्याद् अमा सन्निधानार्थे सहार्थे इति हेमचन्द्रः । कीदृशः । गुरुमहिमा महतो भावो महिमा गुर्वी महिमा यस्य सः । एवम् परमायास्तम्भी परेषां शत्रूणां या माया तस्याः स्तम्भी रिपुकपटनाशक इत्य् अर्थः । कीदृशं स्वपुरम् ।

शशिना समहासमहा नगरे जनता समहा समहास्त मुदम् ।
अतिभासुरया सुरया व्यहरद् व्यतनोत् सुरया सुरयागम् अपि ॥५४॥

इति श्रीकालिदासकृते नलोदये सत्काव्ये प्रथमोच्छ्वासः

॥ १ ॥

परमाया उत्कृष्टायाः रमायाः लक्ष्म्याः वसतिं स्थानम् । तत् किम् । यत्र पुरे आयाः धनागमनानि क्षमापरं सहिष्णुताशीलं तं नलम् अगुः प्रापुः ॥५३॥

शशिने 'ति । जनता जनसमूहः नगरे नलपुरे मुदं हर्षं समहास्त प्राप । ओहाङ् गताव् इत्य् अस्य धातोः प्रयोगः ये गत्यर्थास् ते प्राप्त्यर्था ज्ञानार्थाश् च । किम्भूता जनता । शशिना चन्द्रेण समहासमहा । समं हासस्य महस् तेजो यस्याः सा । महस् चो 'त्सवतेजसोर् इत्य् अमरः । एवं समहा महेन उत्सवेन सह वर्तमाना सा एवं सुरया शोभनो रयः शब्दो यस्याः सा सुरया पुनः जनते 'व सुरया मदिरया व्यहरत् चिक्रीड । सुरयागम् अपि देवार्चनम् अपि व्यतनोद् अकरोत् । कीदृशया सुरया । भासुरया स्वच्छया ॥५४॥

इति श्रीनलोदयटीकायां सुबोधिन्याम् प्रथमोच्छ्वासः

॥ १ ॥

अथ रतिर् एकान्तेन प्रापि नलेना 'त्र मन्दिरे कान्तेन ।
ताम् पुनर् एकां तेन प्राप्तवता रिपुमदातिरेकान्तेन ॥१॥
बभौ स सारसागरस् चकास सा रसार्द्रधीः ।
मधुः ससारसारवस् तदा ससार सार्तवः ॥२॥
समुद्धिता 'शालीनां करेण कणिशाग्ररुचिजिता शालीनाम् ।

अथे 'ति । अथा 'नन्तरं कान्तेन कमनीयेन । एवं ताम् भैमीम् पुनर् एकाम् महीं च प्राप्तवता । यद्वा । एकाम् मुख्यां ताम् भैमीम् एव प्राप्तवता । एवं रिपुमदातिरेकान्तेन रिपूणां शत्रूणाम् मदो गर्वस् तस्या 'तिरेक आधिक्यं तस्या 'न्तेन नाशकेन । तेन नलेन । एकान्तेना 'तिशयेना 'त्र मन्दिरे रतिः क्रीडा प्रापि प्राप्ता । यद्वा । एकान्ते ऽत्र मन्दिरे रतिः न प्रापी 'ति न किं तु प्राप्तै 'व काक्वर्थे नञ् ॥१॥

बभाव् इति । सारस्य बलस्य सागरः समुद्रः स नलो बभौ शुशुभे । सारो बले स्थिरांशे चे 'त्य् अमरः । एवं रसार्द्रधीः रसेन प्रेम्णा आर्द्रा रसकोमला धीर् बुद्धिर् यस्याः सा दमयन्ती चकास शुशुभे । तदा तस्मिन् अवसरे मधुर् वसन्तः ससार आजगाम । मधुस् चैत्रर्तुदैत्येषु इति हेमचन्द्रः । कीदृशो मधुः । ससारसारवः । सारसानाम् आरवः शब्दस् तेन सहितः । पुनः कीदृक् । सार्तवः ऋतौ भवम् आर्तवम् पुष्पादि तत्सहितः । सृ गताव् इत्य् अस्य लिटि ससारे 'ति ॥२॥

समुद्धी 'ति । दिनभर्ता सूर्यः करेण किरणेन नलिनीं समुदधित समुत्थापितवान् विकाशयामासे 'ति यावत् । अथा 'नन्तरम् अलीनाम् भ्रमराणाम् आशा इच्छा समुत्थिता उदिता । कीदृशेन करेण । शालीनां धान्यानां कणिशाग्ररुचिजिता कणिशाग्रस्य या रुक् तां जयती 'ति तत् तेन व्रीहिमञ्जर्यग्रकान्तिजिता कणिशं

दिनभर्ता शालीनाम् इव नलिनीम् अथ समुन्थिता 'शा 'लीनाम् ॥३॥
कुर् अवाप च सारसकाकुरवान् कुरवाख्यनगो ऽपि तदा 'ङ्कुरवान् ।
कम् अलङ्कृतवद् गतपङ्कमलं कमलं न विलोभयितुं कम् अलम् ॥४॥
अगुर् अतिमहिमानी तम् ततो रविमहांसि गुरुतमहिमानीतः ।
भवनम् महि मानी 'तः स्मरेण परितः शराख्यम् अहिम् आनीतः ॥५॥
स्मरसूचितया जगतः क्षितिसूचितया 'भवद् धि चम्पकमुकुलम् ।

शस्यमञ्जरी 'त्य् अमरः । कीदृशीं नलिनीम् । आशालीनां चन्द्रकरस्पर्शात् आशासु दिक्षु लीनाम् अदर्शनगताम् । काम् इव । शालीनाम् इव लज्जिताम् इव । अन्या 'पि परपुरुषकराकृष्टा लज्जिता भवति । परपुरुषभक्ता 'पि स्वामिना न त्यक्ता करेणो 'त्ता तत्र पङ्कानाम् आशा भवती 'ति भावः अलिः पङ्के च षट्पदे इति रन्तिः ॥३॥

कुर् अवापे 'ति । तदा वसन्तकाले कुः पार्थिवी सारसकाकुरवान् सारसानां काकवो मनोहरा ये रवाः शब्दास् तान् अवाप प्राप । कुरवाख्यनगो ऽपि कुरवकवृक्षो ऽप्य् अङ्कुरवान् जात इति शेषः । कमलम् पद्मं कं जलम् अलङ्कृतवत् शोभयत् । एवं कम् पुरुषं विलोभयितुं न अलम् अपि तु सर्वान् एव रञ्जयितुं समर्थम् । कीदृशं कम् । गतपङ्कमलं गतः पङ्करूपो मलो यस्य तत् तं कर्दमरहितम् इत्य् अर्थः ॥४॥

अगुर् अतो 'ति । रविमहांसि सूर्यतेजांसि गुरुतमहिमानीतः अतिशयेन गुरुर् गुरुतमः गुरुतमा चा 'सौ हिमानी च सा तया ततः पञ्चम्याम् तसिल् इतस् ततः अगुः प्रासरन् । कीदृशानि रविमहांसि । अतिमहिमानि अत्यन्तं महिमा येषां तानि महाप्रभावाणि । मानी अभिमानी स नलः महि मह उत्सवस् तद्युताम् भवनम् प्रासादम् इतः प्राप्तः । कीदृशो मानी । परितः समन्तात् स्मरेण कामेन शराख्यम् अहिं सर्पम् आनीतः प्रापितः सर्पसदृशस्वबाणगोचरीकृत इत्य् अर्थः कामपीडया रविरश्मिप्रतापेन च बहिः स्थातुम् अशक्नुवन् गृहं गत इति भावः ॥५॥

स्मरे 'ति । हि निश्चये तच् चम्पकमुकुलं चम्पककुड्मलं स्मरसूचितया अनङ्गसूचेर् भावत्वेना 'भवत् जातम् । तत् किम् । यन् मुकुलम् । जगतः क्षितिसू-

तद् असूचि तया व्यथया निरसू चितया यया वियुग्दम्पतिकौ ॥ ६ ॥
विरलोच्चपलाशस्य प्रचुरम् पुष्पम् बभूव च पलाशस्य ।
स्मरनीचपलाशस्य प्राश्याध्वगपिशितचारु चपलाशस्य ॥ ७ ॥
ऋतौ बभुर् निशाह्वया विभाविभाविभाव् इभाः ।
कलाश् च तेषु सत्यतेर् अदारदारदा रदाः ॥ ८ ॥
इह ललनाशोकालिप्रदेन येना ऽत्ममकृविनाशो ऽकालि ।

चितया । जगतः संसारस्य चितौ प्रहारे सुतराम् उचितया योग्यतया तया तज्जन्यया व्यथया असूचि ज्ञापितम् । तया कया । यया चितया वृद्धिम् प्राप्तया व्यथया वियुक्तौ दम्पतिकौ विरहितस्त्रीपुरुषौ निरसू गतप्राणौ कृतौ । स्वार्थे कः ॥ ६ ॥

विरल इति । च पुनः विरलोच्चपलाशस्य विरलानि अप्रचुराणि उच्चानि पलाशानि पत्राणि यस्य । पत्रम् पलाशं छदनं दलम् पर्णं छदः पुमान् इत्य् अमरः । तस्य पलाशस्य वृक्षविशेषस्य प्रचुरम् पुष्पम् बभूव जातम् । कीदृशम् पुष्पम् । चपलाशस्य चपला आशा तृष्णा यस्य तस्य स्मरनीचपलाशस्य स्मर एव नीचस् तुच्छः पलाशो मांसाशी राक्षसस् तस्य प्राश्याध्वगपिशितचारु प्राश्यम् भक्षणयोग्यं यत् अध्वगस्य पथिकस्य पिशितम् मांसं तद्वच् चारु मनोहरम् । पथिकप्राणहारकत्वेन स्मरस्य राक्षसतुल्यत्वम् ॥ ७ ॥

ऋताव् इति । विभाविभाविभौ विभावो रत्यादिकारणं विद्यते यस्याः सा विभाविनी भा कान्तिस् तया विभौ व्यापके ऋतौ वसन्ते निशाह्वया इभाः निशे 'वा ऽऽह्वा नाम येषां ते इभा हस्तिनः मदजनकत्वात् रात्रिरूपा हस्तिन इति रूपकम् । बभुः शुशुभिरे च पुनस् तेषु रात्रिलक्षणगजेषु सत्यतेश् चन्द्रस्य कलाः रदा दन्ताः बभुः कीदृशाः रदाः अदारदारदाः । अदाराः जायारहितास् तेषां दारदाः दारं हृदयविदारणं ददती 'ति ते । यद्वा । किम्भूते ऋतौ विभौ विशेषेण शोभमाने । किम्भूता इभाः विभाः विशेषेण शोभमानाः किम्भूता रदाः विभाः विशेषेण शोभमानाः ॥ ८ ॥

इहे 'ति । इह वसन्ते । ललनाशोकालिप्रदेन येन ललना स्त्री तस्याः शोकस्या ऽऽलयः पङ्क्तयस् ताः प्रददाति कामिनीविरहं विस्तारयता येन पुरुषेण

कामिना ऽशोकालिस्वनहुङ्कृतिभिः स दिक्षु अनाशो ऽकालि ॥ ९ ॥
स्मरस्य युद्धरङ्गतां रसा ऽऽर सारसारसा ।
जिता वियोगिनः समुन्नतेननतेन तेन ते ॥ १० ॥
नुन्नमना मधुना ना ऽऽश्रयति मृतिं को विना ऽङ्गनाम् अधुना ना ।
इति ललना मधु नानाविधम् अधयत् किल तदर्थनाम् अधुनाना ॥ ११ ॥
पिको ऽपि को ऽपि कोपिको वियोगिनीर् अभर्त्सयत् ।

ऽऽत्ममहविनाशः आत्मनो यो महः कामोत्सवस् तस्य विनाशः अकालि अकारि । स पुरुषः दिक्षु दिशासु अशोकालिस्वनहुङ्कृतिभिर् अशोकवृक्षसम्बन्धिनो ये अलयो भ्रमरास् तेषां स्वनाः शब्दास् त एव हुङ्कृतयस् तर्जनावाचस् ताभिः करणेन कामेन अनाशः आशा वाञ्छा तया रहितो ऽपि अकालि अबन्धि जितेन्द्रियो ऽपि वसन्ते भ्रमरशब्दादिना बद्धो भवती ऽति भावः । अथवा न विद्यते नाशो यस्य स मृत्युञ्जयतुल्यो ऽपि कामेन अबन्धि इत्य् अर्थः ॥ ९ ॥

स्मरस्ये ऽति । सारसारसा साराः श्रेष्ठाः सारसाः पक्षिणो यस्यां सा रसा पृथ्वी स्मरस्य युद्धरङ्गतां समरभूमिभावम् आर प्राप समुन्नतेननतेन सम्यक् प्रकारेणो ऽन्नता उत्कृष्टा इनता प्रभुता यस्य स तेन । तेन कामेन ते पुरुषा जिताः स्ववशीकृताः । ते के । ये वियोगिनः सस्त्रीकाः । स्त्रीरहिता वा । स्मरतापपराजिताः सन्तः स्त्रीभिः सह ऽऽसक्ता बभूवुर् इति भावः । यद्वा कीदृशी रसा । सारसारसा । आरस्यत इत्य् आरसः शब्दः सारसानां यः शब्दस् तद्विशिष्टा ॥ १० ॥

नुन्ने ऽति । अधुना वसन्तसमये । मधुना वसन्तेन नुन्नम् प्रेरितम् मनम् चित्तं यस्य स कः ना पुरुषो यो ऽङ्गनां रमणीं विना मृतिम् मृत्युं ना ऽऽश्रयति न प्राप्नोति । अपि तु सर्वो ऽपि मृतिम् आश्रयत्य् एव । किल सत्ये इति हेतोर् ललना स्त्री नानाविधम् नानाप्रकारम् मधु मद्यम् अधयत् अपिबत् । कीदृशी ललना । तदर्थनां तस्य नायकस्या ऽर्थना याचना ताम् अधुनाना अनिराकुर्वाणा अङ्गीकुर्वाणे ऽत्य् अर्थः । रतिसमये पुरुषः अस्माकं वशताम् एष्यती ऽत्य् आनन्देन मधु अपायद् इति भावः । यद्वा तन्मरणशङ्कया मधु अधरामृतम् अपायद् इति भावः ॥ ११ ॥

पिक इति । कोपिकः कोपो ऽस्या ऽस्ती ऽति कोपी कोप्य् एव कोपिकः सकोपः

वचांसि भङ्गम् आलपन् इतानि तानि तानि ताः ॥१२॥
श्रीर् आपि कलापेन प्रवृद्धम् आम्रावलिषु च पिकलापेन ।
न कलापिकलापेन प्रणर्तनम् अकारि वाग् अपि कला 'पे न ॥१३॥
सहकारवृते समये सहका रहणस्य के न सस्मार पदम् ।
सहकारम् उपरि कान्तैः सह का रमणी पुरः सकलवर्णाम् अपि ॥१४॥
अधिगतकामधुरा गाद् अगम् एत्य भ्रमरपटलिका मधु रागात् ।
पीत्वो 'त्का मधुरा गा द्रुतम् अकृत ततः श्रियो ऽधिका मधुर् आगात् ॥१५॥

इत्य् अर्थः । यद्वा । कोपयतो 'ति कोपिकस् तासाम् एव कोपकर्ते 'ति यावत् । अपि सम्भावनायाम् एतादृशः कोपिपिकः कोकिलस् ता वियोगिनीर् अभर्त्सयत् भर्त्सितवान् । भर्त्सनं त्व् अपकारगीर् इत्य् अमरः । किं कुर्वन् । भङ्गं रचनाविशेषम् इतानि प्राप्तानि । तानि तानि वचांसि वसन्तकालीनानि आलपन् कुर्वन् ॥१२॥

श्रीर् आपी 'ति । कलापेन कलाः पाती 'ति कलापश् चन्द्रस् तेन श्रीः शोभा आपि प्राप्ता । पिकलापेन पिकानां लापः संलापस् तेन आम्रावलिषु आम्रवृक्षपङ्क्तिषु प्रवृद्धम् अतिवृद्धिः प्राप्तम् । कलापिकलापेन कलापा बर्हा एषां सन्ती 'ति कलापिनो मयूरास् तेषां कलापेन यूथेन प्रणर्तनम् प्रकृष्टं नृत्यं ना 'कारी 'ति न किं तु कृतम् एवे 'त्य् अर्थः । च पुनः कला परिस्फुटा वाग् अप्य् आपे प्राप्ता ॥१३॥

सहकारे 'ति । सहकारवृते सहकार आम्रवृक्षस् तत्पुष्पम् अपि सहकारं तेन वृते समये वसन्ते के पुरुषाः रहणस्य स्त्रीविरहजन्मदुःखस्य सहकाः सहनक्षमाः न के ऽपी 'त्य् अर्थः । का रमणी स्त्री कान्तैः सह भर्तृभिः सह उपरि अन्ते सहकारं हकारवर्णसहितं पुर आदौ सकलवर्णम् अपि कश् च लश् च कलौ वर्णौ ताभ्यां सहितम् पदं वाक्यं कलहम् इति यावत् । न सस्मार न स्मृतवती तथा च सर्वै 'व कलहं विस्मृत्य कान्तसङ्गमं चकारे 'ति भावः ॥१४॥

अधी 'ति । रागात् प्रीतेः मधु पुष्परसम् पीत्वा द्रुतं शीघ्रम् उत्का उत्कण्ठिता सती अधिगतकामधुरा अधिगता प्राप्ता कामस्य धूर् भारो यया सा त्वयै 'तत् कर्तव्यम् इति स्वीकृतमन्मथाज्ञा समुदा ये 'ति यावत् । एवम्भूता भ्रमरपट-

न समानसमानसमानसमागमम् आप समीक्ष्य वसन्तनभः ।
भ्रमदभ्रम् अदभ्रमदभ्रमदभ्रमरच्छलतः खलु कामिजनः ॥१६॥
गतम् अत्र च येन गृहाद् असमुत्तरता ऽन्तर् अतान्तरतान्तरताम् ।
पर एव विकार इयाय वृहत्तमसन्तमसं तम् असन्तम् असन् ॥१७॥

लिका मधुपश्रेणिर् अगाद् वनात् अगं वनम् एत्य प्राप्य मधुराः गाः वाणीर् अकृता ऽकरोत् । ततः भ्रमरमधुरगुञ्जितात् मधुर् वसन्तो ऽधिकाः श्रियः शोभा आगात् प्राप ॥१५॥

न समाने ऽति । खलु निश्चये कामिजनः कामुकसमूहः समानसमानसमानसमागमं न आप । मानसे मानो मानसमानस् तेन सह वर्तमानः समानसमानः समानसमानश् चा ऽसौ समानः बन्धुश् च मनोवर्तिमानसहितबन्धुर् इति यावत् । तस्य समागमं न प्रापे ऽति काकुः प्रापे ऽवे ऽत्य् अर्थः । यद्वा । स कामिजनः मानसे चित्ते यो मानः तेन समानस् तुल्यो यः समागमः तं खलु निश्चितं न प्राप किं तु वसन्तोद्दीपितः सन् अकालसमागमम् प्रापे ऽत्य् अर्थः । किं कृत्वा । वसन्तनभः वसन्तसम्बन्धिनभ आकाशं समीक्ष्य दृष्ट्वा । कीदृशं नभः । अदभ्रमदभ्रमदभ्रमरच्छलतः भ्रमदभ्रम् । अदभ्रम् बहुलम् मदो येषां ते अदभ्रमदाः । मेघमालात्वेन स्वस्मिन् भ्रमं ददती भ्रमदाः । अदभ्रमदाश् च ते भ्रमदाश् च ते भ्रमराश् च तेषां छलतो व्याजात् भ्रमन्त्य् अभ्राणि मेघा यत्र तत् । अभ्रम् मेघो वारिवाहः । अदभ्रम् बहुलम् बहु इत्य् अमर ॥१६॥

गतम् इति । अत्र वसन्तसमये च पुनर् येन पुरुषेण गृहाद् गतं निर्गतम् परः शत्रुः विकारो धातुविकार एव तम् इयाय प्राप । कीदृशेन । अन्तः अतान्तरतान्तरताम् असमुत्तरता अन्तः हृदि अतान्तम् अविस्तीर्णं यद्रतान्तरं स्मरतान्तरं तस्य भावस् तत्ता ताम् असमुत्तरता अप्राप्तवता । यद्वा । अन्तः हृदि अतान्तम् असमाप्तं रतं यस्याः सा अतान्तरता अन्तर् मनसा अतति स्वामिनं गच्छति सततं ध्यायती ऽति यावत् सा अन्तरता । अतान्तरता चा ऽसौ अन्तरता चे ऽति सा ताम् असमुत्तरता उल्लङ्घयता त्यक्तवता तॄ प्लवनतरणयोर् इति । किम्भूतम् पुरुषम् । बहुतमसन्तमसं बहुतमम् अधिकं सन्त-

क्रुधि कान्तवशं नवदामसमापनयापनया ऽप न या ऽपनया ।
तम् ऋते ऽनुशयेन च ताम् अशनैर् अवतारवता ऽर वता ऽरवता ॥१८॥
नभसो विवरं कुसुमेक्षणभाग् अतरो गतरोगतरो ऽगतरो ।
वद कान्तम् अवेक्ष्य यथा ऽद्य मधाव् अरम् एव रमे ऽव रमे वर मे ॥१९॥
श्रिते ऽति गाम् अनागतस्वबन्धुका मनाग् अतः ।
परा ऽप नाम ना ऽगतस् ततास कामनागतः ॥२०॥

मसम् अशनं यस्य तम् । एवम् असन्तम् अविवेकिनम् । कीदृशः विकारः । असन् अपरिहार्यो ऽसाधुर् वा ॥१७॥

क्रुधी ऽति । या स्त्री क्रुधि क्रोधे सति नवदामसमापनयापनया । नवं च तद् दाम च नवदाम नवीना माला तस्याः समापनं समाप्तिस् तया या यापना कालातिक्रमस् तेन कारणेन कान्तवशं नायकसमीपं न आप न प्राप । यापनं कालविक्षेपे इति हेमः । कीदृशी या । अपनया अपगतो नयो नीतिर् यस्याः सा । अरवता मूकत्वम् अनुशयेन पश्चात्तापेन सह अशनैः शीघ्रं तं कान्तम् ऋते विना तां नायिकाम् आर प्राप । कीदृशेना ऽनुशयेन । आसमन्तात् अवतारवता अवतारो ऽस्या ऽस्ती ऽत्य् अवतारवान् तेन तदानीम् उत्पन्नेन । वत खेदे ॥१८॥

नभस इति । श्रिते ऽति । युग्मम् । हे वर श्रेष्ठ अगतरो हे पर्वतसम्बन्धिवृक्ष त्वं नभस आकाशस्य विवरम् अन्तरम् अतरः तीर्णवान् असि अत्युच्चो ऽसी ऽत्य् अर्थः । कीदृशस् त्वम् । कुसुमेक्षणभाक् कुसुमान्य् एवे ऽक्षणानि नेत्राणि तद्भाक् तद्युक्तः । एवं गतरोगतरः अतिशयितो रोगो रोगतरः गतो रोगतरो यस्य यस्माद् वा स दुःसहरोगरहित इत्य् अर्थः । अतो मे कान्तम् अवेक्ष्य दृष्ट्वा तथा वद कथय यथा अद्य मधौ वसन्ते अरम् एव शीघ्रम् एव रमे ऽव लक्ष्मीर् इव रमे क्रीडां करोमि । लघु क्षिप्रम् अरं द्रुतम् । क्षीराब्धितनया रमे ऽत्य् अमरः ॥१९॥

श्रिते ऽति । परा उत्कृष्टा नायिका इत्य् अनेन प्रकारेण श्रिता आश्रिता ऽर्थाद् वृक्षम् एव । अतः अगत एतस्माद् वृक्षात् मनाक् ईषद् अपि गाम् प्रत्युत्तरवचनं न आप न प्राप । कीदृशी । अनागतस्वबन्धुका न आगतः स्वकीयो बन्धुर्

का ललना दिवसं तं कुसुमशरम् असोढ ऋतू अनादि वसन्तम् ।
अलिभिर् अनादि वसन्तं दृष्ट्वा यत्रा ऽत्मनो ऽर्थनाद् इव सन्तम् ॥२१॥
स्वयम् अथ मन्दारितया युक्तो युक्तं नलः स मन्दारितया ।
आरामं दारितया मदनेन धिया ऽपद् उत्तमं दारितया ॥२२॥
अनुव्रता समाननं समा ननन्द भीमजा ।
तम् इन्दुना समाननं समाननन्दने वने ॥२३॥

भर्ता यस्याः सा । नाम निश्चये कामनागतः काम एव नागः कृष्णसर्पस् तस्मात् तताम ताम्यति स्म । अनेन प्रलापोन्मादव्याधय इति तिस्रो दशाः सूचिताः ॥२०॥

के 'ति । का ललना कामिनी तं दिवसं तस्मिन् दिवसे वसन्त ऋतौ कुसुमशरम् असोढ सहितवती न का 'पी 'त्य् अर्थः दिवसम् इति कालाध्वनोर् अत्यन्तसंयोगे इति द्वितीया । किम्भूतं कुसुमशरम् हृदि मानसे अनादि सर्वदा वसन्तं स्थितिमन्तम् । यत्र दिवसे सन्तं वर्तमानं वसन्तम् ऋतुं दृष्ट्वा अलिभिर् भ्रमरैर् अनादि नादो ऽकारी 'त्य् अर्थः । उत्प्रेक्षते आत्मनो ऽर्थनाद् इव आत्मीयसुरतप्रार्थनाद् इव । तथा च कीटा अपि सुरतम् प्रार्थयन्ति किमुत मानुषी 'ति भावः ॥२१॥

स्वयम् इति । अथा 'नन्तरं स नलः स्वयम् मन्दारितया युक्तम् मन्दारा अस्य सन्ती 'ति मन्दारी मन्दारिणो भावो मन्दारिता तया युक्तं सहितम् मन्दारवृक्षसम् ह- सहितम् । उत्तमं श्रेष्ठम् आरामम् उपवनम् आपत् प्राप । कीदृशो नलः । मन्दारितया युक्तः । मन्दा अरयो ऽस्य सन्त्य् असौ मन्दारी तस्य भावस् तत्ता तया सहितः कर्तव्यविचारानभिज्ञशत्रुत्वसहितः । यद्वा । मन्दश् चा 'सौ अरिश् चे 'ति मन्दारिः तस्य भावः मन्दारिता तया हेतौ तृतीया शत्रुभावेन कामेन खण्डितधिया युक्त इत्य् अर्थः एवम् मदनेन स्मरेण दारितया खण्डितया बुद्ध्या युक्तः । एव दारितया युक्तः । दाराः अस्य सन्ती 'ति दारी दारिणो भावो दारिता तया सहितः स्त्रीमत्तया संयुक्तः ॥२२॥

अनुव्रते 'ति । समाननम् मानना पूजा तया सहितम् पूज्यम् इत्य् अर्थः । इन्दुना समाननं चन्द्रसदृशम्मुखं तं नलम् अनुव्रता अनुगता अनुब्रजा वा । समा

इह रुचिराम् आवलयस्व दृशम् इति पृथक् प्रियस्य रामावलयः ।
प्राप्तारामा वलयस्फुरो गिरा यदुदरे ऽभिरामा वलयः ॥२४॥
नवकुसुमानमनागा गन्तुं नै ’च्छत् परा समानमना गाः ।
अज्ञानि पुमान् अमनाग् आश्रित्य स सत्कुसुमदानमानम् अनागाः ॥२५॥
रुपितं सखि सादम् अमुष्य लसत्तनुतेतनुते तनु ते तनुते ।
न न वाननवाननवान् अनवाग् इह ते चरणे नृतिम् एष्यति सः ॥२६॥

सलक्ष्मीका भीमजा दमयन्ती । समाननन्दने समानं सदृशं नन्दनम् इन्द्रवनं यस्य तस्मिन् वने ननन्द आनन्दम् प्राप्तवती । समाननन्दे ’ति वा क्रियापदम् ॥२३॥

इहे ’ति । हे सुन्दरि इह वने रुचिराम् मनोज्ञां दृशं चक्षुर् आवलयस्व आवर्तय इत्य् अनेन प्रकारेण प्रियस्य भर्तुर् गिरा वचनेन ताः रामावलयः स्त्रीश्रेणयः पृथक् ऐकैकशः प्राप्तारामा आरामगता अभूवन् अरण्यं जग्मुर् इत्य् अर्थः । कीदृश्यः वलयैः कटकैः स्फुरन्ती ’ति क्विप् वलयस्फुरः । कटकं वलयो ऽस्त्रियाम् इत्य् अमरः । अथवा प्रियस्य वचनेन स्फुरस् तुष्टा बभूवुः कथम्भूताः प्राप्तारामावलयः प्राप्ता आरामाणाम् आवलयो याभिस् ता इत्य् अर्थः । ताः काः । यदुदरे यासाम् उदरे ऽभिरामाः सुन्दरा वलयस् त्रिबलीभङ्गा इत्य् अर्थः । करोपहारयोः पुंसि वलिः प्राण्यङ्गजे स्त्रियाम् इत्य् अमरः ॥२४॥

नवे ’ति । नवकुसुमानमनागाः नवैः कुसुमैर् आनमन्ती ’ति नवकुसुमानमनास् तादृशा अगा वृक्षा यासु ता गाः वनभुवः गन्तुं यातुम् परा ’न्या स्त्री नै ’च्छन् ना ’यासीद् इति । कीदृशी । समानमनाः समानम् मानसहितम् मनो यस्याः सा कृतमाने ’त्य् अर्थः । स पुमान् सापराधः पुरुषः अमनाक् अनल्पं सत् । सत्कुसुमदानमानं सुकुसुमानां दानम् एव मानः सम्माननना ताम् आश्रित्य अनागा निरपराधो ऽज्ञानि ज्ञातः स पुष्पवनं गन्तुम् अनिच्छन्त्या मानिन्याः स्वावचितसत्पुष्पदानेन मानम् अपाचकार । सत्कुसुमदामदानम् इति पाठे पुष्पमालादानम् आश्रित्ये ’त्य् अर्थः ॥२५॥

रुपितम् इति । नायकप्रेरितदूतीवाक्यम् । हे सखि लसत्तनुतेतनुते लसन्ती तनुर् यस्या असौ लसत्तनुस् तद्भावस् तत्ता तया उता प्राप्ता नुतिः स्तुतिर् यया सा

अपि चे 'त्य नगान् अवतानवता नवता न वता 'स्ततरा मधुना ।
इह सौख्यम् अगोचरम् आचर मा चरमा च रमा 'स्य न रम्यतरा ॥२७॥
इति लालिकया 'लिकयातकचैर् अतिकालिकया 'लिकया कथिता ।
दयितं समया समयाद् अपरा व्यहरत् स मया समया च तया ॥२८॥

तत्सम्बुद्धिः कमनीयशरीरतालब्धस्तुते । ते तव तनु स्वल्पम् अपि रुषितं रोषो ऽमुष्य तव प्रियस्य सादम् अवसन्नतां तनुते विस्तारयति । त्वयि रुष्टायाम् अस्य बहुदुःखं जायत इति भावः । स तव कान्तः इह 'स्मिन् वसन्ते ते चरणे त्वत्पदे ऽनवाक् अवाक् अधोमुखः न अवाक् अभिमुखः । अथवा अवाक् मूकः अनवाक् स्तुतिवाक्यसहितः सन् इत्य् अर्थः । कथम्भूतः वाननवाननवान् वानं शुष्कं नव यौवनोदयसुन्दरम् आननम् मुखं यस्य स तादृशः । स प्रियः मतिं न एष्यति इति ना 'पि तु मरिष्यत्य् एव । त्वच्चरणापतितस्या 'स्य प्राणास् तिष्ठन्ति नो 'चेन् मदनव्यथया शुष्कमुखस्य मरणम् एवे 'ति भावः मतिम् इत्य् अत्र नतिम् इति पाठे नतिम् प्रणामम् एष्यती 'त्य् अर्थः । स्तवः स्तोत्रं नुतिः स्तुतिर् इत्य् अमरः । वानं शुष्के गतौ गन्ध इति वैजयन्ती । पराङ्मुखः पराचीनः स्याद् अवाङ् अप्य् अधोमुख इत्य् अमरः । इण् गताव् इत्य् अस्य लृटि एष्यती 'ति ॥२६॥

अपी 'ति । पुनस् ताम् एवा "ह । हे सखि अवतानवता । अवतानो विस्तारो ऽस्या 'स्ती 'त्य् अवतानवान् तेन मधुना वसन्तेन नवता नवीनता न अस्ततरा 'तिशयेन त्याज्या । वता "श्चर्ये किं तु वसन्तो नूतनतां त्यजिष्यत्य् एवे 'ति भावः । किं कृत्वा । नगान् वृक्षान् एत्य प्राप्य । इह प्रौढवसन्ते ऽगोचरं वक्तुम् अशक्यं सौख्यम् आचर लभस्व अस्य वसन्तस्य चरमा पश्चिमा रमा लक्ष्मीश् च पुनः मा शोभा रम्यतरा सुन्दरी न भवति । वसन्तमध्ये भर्त्रा सह रत्यादिकं सुखम् अनुभूयताम् पश्चात्तनी शोभा तु न भव्ये 'ति भावः । नुन्ननुत्तास्तनिष्ठ्यूता विद्धक्षिप्तेरिताः समाः । नवीनो नूतनो नवः । आचरे 'ति चर गतिभक्षणयोर् इत्य् अस्य लोटि ॥२७॥

इती 'ति । इत्य् अनेन प्रकारेण लालिकया लालयन्त्या आलिकया सख्या कथिता उक्ता अपरा स्त्री दयितं समया भर्तुः समीपं समयात् अगात् । दयितम् इति समयायोगे समया अभित इत्यादिना द्वितीया । समया 'न्तिकमध्ययोर्

अतिरुचिमान् अस्तवकः सरस्तटो ऽयं विचीयमानस्तवकः ।
इह खलु मानस् तव कः प्रियाम् इति परो ऽनयत् समानस्तवकः ॥२९॥
अरुणतरपरागस्य प्रसवम् प्रैक्षिष्ट न पुनर् अपरा गस्य ।
हसितैर् अपरागस्य स्वैस् तिष्ठन्त्य् अपि लवेप्सुर् अपराग् अस्य ॥३०॥

इत्य् अव्ययवर्गो मेदिनी । समयाद् इति यातेर् लङि । च पुनः स कामुकः । मया लक्ष्मया समया तुल्यया तया स्त्रिया सह व्यहरद् विचिक्रीड । कीदृश्या । अलिकयातकचैर् अलिके याता प्राप्ता ये कचास् चूर्णकुन्तलास् तैर् अतिकालिकया श्यामलया सख्या वा विशेषणम् । ललाटम् अलिकं गोधिः । कचः केशः शिरोरुह इत्य् अमरः ॥२८॥

अती ऽति । कश्चिन् मानवतीम् मानयन् आह । हे सुन्दरि अयं विचीयमानस्तवको विभिः पक्षिभिर् भ्रमरप्रभृतिभिश् चीयमाना मकरन्दपानाया ऽन्विष्यमाणाः स्तवकाः पुष्पगुच्छा यस्मिंस् तादृक् । अथवा । विचीयमाना अवचीयमानाः सम्भग्नाः स्तवका यस्मिंस् तादृक् । अस्तवकः अस्ता गता वका यस्मात् तादृक् । सरस्तटस् तडागतीरम् । अतिरुचिमान् अतिसुन्दरः । इहा ऽस्मिन् स्थले तव कः मानः खलु निश्चितं कः प्रस्तावः इति क्रमेण समानस्तवकः समानः मानसहितः सादर इति यावत् स्तवकः स्तुतिर् यस्य स तादृक् कामुकः प्रियां स्त्रियम् अनयद् अनैषीद् रत्यै इति यावत् । पुष्पवासलोभभ्रमद्भ्रमरे वकादिराहित्येन निर्जने मानो ऽनुचित इत्य् एतादृशान्यस्थलाभावाद् इह सम्भोगो भवत्व् इति हस्ते गृहीत्वा कुञ्जम् अविशद् इति भावः । अनयद् इति नियोलङि ॥२९॥

अरुणे ऽति । अपरा ऽन्या ऽङ्गना ऽरुणतरपरागस्य अरुणतराः अतिशयेना ऽरुणाः परागाः कुसुमरजांसि यस्य तादृशस्या ऽस्य अगस्य वृक्षस्य स्वैः स्वकीयैर् हसितैर् हासैर् अपरागस्य अपगतलौहित्यस्य अपराक् सम्मुखं लवेप्सुः पुष्पम् अवचिकीर्षुस् तिष्ठन्त्य् अपि विद्यमाना ऽपि प्रसवम् पुष्पं न पुनः प्रैक्षिष्ट ना ऽपश्यत् लोहितकुसुमस्य स्वहासेन शुक्लीभूतत्वाद् विस्मयो जात इति भावः । लवो ऽभिलावो लवने । स्याद् उत्पादे फले पुष्पे प्रसवो गर्भमोचने । शैलवृक्षौ नगाव् अगौ इत्य् अमरः । ईक्ष दर्शनाङ्कनयोर् इत्य् अस्मात् प्रपूर्वाल् लुङ्याटिसिचोटिद्रूपम् ॥३०॥

अवेक्ष्य पल्लवालयान् अगान् श्रितालवालया ।
लतातये 'व बालया बभे ऽन्यया बबाल या ॥३१॥
व्रततीनाम् आलीनाम् मध्ये ऽन्यो व्यचिनुता 'ङ्गनाम् आलीनाम् ।
अप्य् एनाम् आलीनां स्मिताच् च जानन् मदाच् च नामा 'लीनाम् ॥३२॥
कमितुः कलुषाप्तिसुखार्थनभाग् अपराग् अपरा 'गपरागपरा ।
स्थितिम् आप तये 'व हृतः स पुमान् अनया न न या 'ननयाननया ॥३३॥

अवेक्ष्ये 'ति । अन्यया बालया षोडशवार्षिक्या लतातया इव लतात्वेन रूपेणे 'व बभे शुशुभे । अन्या का । या पल्लवालयान् नवपत्रयुक्तान् अगान् वृक्षान् अवेक्ष्य दृष्ट्वा बबाल उल्ललास अन्या 'पि लता श्रितालवाला आश्रयभूतान् वृक्षान् दृष्ट्वा उल्लसत्य् एवे 'ति भावः । यद्वा । बबाल चचाले 'त्य् अर्थः यथा लता वृक्षान् अधिरोढुं चलति तथे 'ति भावः बल प्राणने स्खलने वा धातोः रूपं कथम्भूतया श्रितालवालया पल्लवानयनार्थं श्रितम् आश्रितम् आलवालं यया तये 'त्य् अर्थः ॥३१॥

व्रतती 'ति । अन्यः कामो आलीनां सखीनां स्मिताद् धासात् । च पुनर् अलीनाम् भ्रमराणाम् मदाज् जानन् अपि कलयन् अपि अङ्गनां स्त्रियं व्यचिनुत विलोकयामास । किम्भूताम् । व्रततीनां लतानाम् मध्ये आलीनां सखीनां च मध्ये आलीनां गुप्तां नाम सम्भावनायाम् । आदौ सर्वा एव लता इति ज्ञानम् आसीत् इदानीं काचित् हसति कुत्रचित् भ्रमराः स्वनन्ति इति ज्ञात्वा तत्रा 'ङ्गनाम् अन्वेष्टुं गतवान् इत्य् अर्थः ॥३२॥

कमितुर् इति । अगपरागपरा वृक्षमकरन्ददर्शनोन्मुखी अत एव कलुषाप्तिसुखार्थनभाक् कलुषम् परागेण यद् अक्षि तस्य यत् सुखम् परागनिष्काशनात् तस्य या 'र्थना याच्ञा ताम् भजती 'ति तद्भाक् । अपरा 'ङ्गना कमितुः कमयती 'ति कमिता भर्ता तस्या 'पराक् सम्मुखं स्थितिं स्थानम् आप प्राप । अनया अङ्गनया स पुमान् पतिस् तथै 'व तेन प्रकारेण भर्तुर् अभिमुखस्थितित्वेन न हृत इति न किं तु वशीकृतः । अनया कया । आननयाननया आननम् मुखं तस्य यानम् भर्तृमुखसमीपप्रापणं तत्र नयो वैदग्ध्यं यस्याः सा । नयनपतितमकरन्दं दूरीकुर्वती नायकाभिमुखम् मुखं प्रसारयन्ती तं जहारे 'ति भावः ॥३३॥

स्वम् अनेनसम् आयतया व्यधिता ऽऽगःस्व् एव कश्चन समायतया ।
अनुमानसम् आयतया तस्मै ना ऽक्रोधि जीवनसमाय तया ॥३४॥
अभवद् अनेना ना विस्मयदो ऽन्यो मानिनीजने नानावि ।
अतिसुजनेना ऽनाविस्खलनं तद् यद् उपवनम् अनेना ऽनावि ॥३५॥
जनाद् असोः समानतः पदाहतिं समानतः ।
परो दधौ समानतः स्वमूर्ध्नि भासमानतः ॥३६॥
तनुच्छटो ऽत्तमालया तया भुवो ऽत्तमालया ।
अहारि शीतमालयानिलावधूतमालया ॥३७॥

स्वम् इति । कश्चन कामी तस्याः स्वभार्याया अग्रे आयतया अतिदीर्घया समायतया मायया कपटेन सह वर्तमानः समायस् तस्य भावः समायता तया सकपटत्वेन आगःसु एव अपराधेषु सत्स्व् अपि स्वम् आत्मानम् अनेनसम् अपराधरहितं व्यधित चक्रे । अनुमानसं कोमलचित्तम् आयतया प्राप्ततया अर्थात् कामिन्या जीवनसमाय प्राणतुल्याय तस्मै भर्त्रे ना ऽक्रोधि न कुपितम् ॥३४॥
अभवद् इति । मानिनीजने विस्मयदो ऽद्भुतदो ऽन्यो ऽपरो ना पूरुषस् तत् तस्माद् धेतोर् अनेना अनपराधो ऽभवद् अभूत् । यद् यस्माद् अनेना ऽतिसुजनेना ऽतिसुष्ठुजनेन पुंसा नानावि नानाविधा वयः पक्षिणो यस्मिंस् तादृशम् उपवनम् आरामो ऽनाविस्खलनं वर्णनावैपरीत्यम् अपशब्दादि वा तद्रहितं यथा स्यात् तथा ऽनावि स्तुतम् । कृतापराधः कश्चित् पुमान् उद्यानवर्णनये ऽव ताम् प्रासीदयद् इति भावः । अनावी ऽति णु स्तुताव् इत्य् अस्य चिणिलुङिरूपम् ॥३५॥
जनाद् इति । परो ऽन्यः कामुकः असोः समानतः असुः प्राणः तस्य समानतः सदृशात् प्राणतुल्यात् समानतः साहङ्कारात् । भासमानतः शोभमानात् जनात् कान्ताजनात् पदाहतिं चरणेन आहतिम् आघातं समानतो ऽतिनम्रः सन् स्वमूर्ध्नि दधौ स्वशिरसि प्रसादम् इव दधारे ऽत्य् अर्थः ॥३६॥
तनुच्छटे ऽति । तया उद्यानभुवा उत्तमालया उद्गता उच्छ्रितास् तमालवृक्षा यस्यां सा तादृश्या पुनः शीतमालयानिलावधूतमालया शीतो यो मालयो ऽनिलो

श्रितलसदारामाभिः प्राप्ये 'ति जनो विहृतिम् उदाराम् आभिः ।
आराद् आरा 'मा 'भिस्फुरितसरोजं सरस् तदा रामाभिः ॥३८॥
किम् अपः सरसी 'मा या त्वं धाम गुणामृतप्रसरसीमायाः ।
द्रुतम् इति स रसी मायात्यक्तो भैम्या नलश् च सरसीम् आयात् ॥३९॥
गतपङ्काः सारस्य श्रियो ऽस्य जह्रुर् मनो ऽधिकाः सारस्यः ।
अपि कोकाः सारस्यास्थिताः कुर्यश् च हंसिकाः सारस्यः ॥४०॥

मलयगिरिसम्भवो वायुस् तेन अवधूता कम्पिता माला वृक्षश्रेणी यस्यां तादृश्या भुवा उत्तमालया उत्तम आलयो गृहं यस्याः सा तादृशी तनुच्छटा स्त्रीसमूहो ऽहारि हृता तथा च मन्दसुगन्धिशीतलवायुसम्बन्धेन मनोहरे उद्याने कान्तसहिता सर्वा विलासिन्य उत्तमगृहं त्यक्त्वा रमणार्थं ययुर् इति भावः । वेल्लितम् प्रेङ्खिताधूतचलिताकम्पिताधुते इत्य् अमरः । छटा कान्तौ संहतौ चे 'ति धरणिर् इति भरतः ॥३७॥

श्रिते 'ति । जनः कामुकः श्रितलसदारामाभिः श्रित आश्रितो लसन् देदीप्यमान आरामो याभिस् तादृशीभिः आभिर् अमूभी रामाभिः स्त्रीभिः अमा सह उदारां श्रेष्ठां विहृतिं विहारम् इत्य् अनेन प्रकारेण प्राप्य तदा तदानीम् आरात् समीपे ऽभिस्फुरितसरोजम् अभि सर्वतः स्फुरितानि फुल्लानि सरोजानि पद्मानि यस्मिंस् तादृशं सरस् तडागम् आर प्राप्तवान् । अमा सह समीपे च । कासारः सरसी सर इत्य् अमरः ॥३८॥

किम् अप इति । हे दमयन्ति त्वम् इमा अपः जलानि किं गच्छसि विहर्तुम् इति शेषः । या त्वं गुणामृतप्रसरसीमाया धाम गुणा एवा 'मृतं तस्य प्रसरो विसर्पणम् प्रवाह आधिक्यं वा तस्य या सीमा मर्यादा तस्या धाम गृहम् । अत्र अमृतशब्देन सुधा जलं चा 'भिधीयते गुणामृतप्रवाहः त्वय्ये 'व स्थित इति भावः । इत्य् एवम् उक्त्वा स नलो रसी रसिकः मायात्यक्तो व्याजहीनो ऽदम्भी भैम्या सह द्रुतं शीघ्रं सरसीं सर आयाद् अगमद् विहर्तुम् इति शेषः । आपः स्त्री भूम्नि वार् वारि । त्यक्तं हीनं विधुतं समुज्झितं धूतम् उत्सृष्टम् इत्य् अमरः । आयाद् इति यातेर् लङि ॥३९॥

गते 'ति । सारस्यः सरस इमाः सारस्यः सरःसम्बन्धिन्यः श्रियः शोभाः कथम्भूताः

का क्षतिर् अस्ति मिताभिः स्फुटम् अद्भिर् इयं विहृतिर् अस्तिम् इताभिः ।
अनतितरस्तिमि ताभिः कम् एत्य यद् अशाङ्कि धृतिभिर् अस्तिम् इताभिः ॥४१॥

अलिर् मिलत्परागतः सरोरुहात् परागतः ।
मुखम् मुदा पराग् अतस् तदीयम् आप रागतः ॥४२॥

गतम् च्युतः पङ्को याभ्यस् तादृश्यः निर्मलाः अधिकाः श्रेष्ठाः । यद्वा । कानि जलानि अधिकृत्य वर्तन्ते ताः । सारस्य सारभूतस्य श्रेष्ठस्या 'स्य नलस्य मनो हृदयं जह्रुर् हृतवत्यः । सारस्यस्थिताः आरस्यत इत्य् आरसः शब्दस् तस्य भाव आरस्यम् आरस्येन सहितं सारस्यं तत्र स्थिताः कृतमधुरध्वनयः । अथवा । सरसस्य भावः सारस्यं तत्र स्थिता विख्याताः । सारस्याज् जलसाहित्याद् वा स्थिताः । कोकाश् चक्रवाकाः कुरर्यः कुररपक्षिस्त्रियः । हंसिका हंसस्त्रियः सारस्यः सारसानां स्त्रियो ऽपि मनो जह्रुः । सरःसम्बन्धिशोभादर्शनेन कोकादिदर्शनेन च मुमुद इति तात्पर्यम् । पङ्को ऽस्त्री शादकर्दमौ । सारो बले स्थिरांशे च । कोकश् चक्रश् चक्रवाक इत्य अमरः । जह्रुर् इति हृञो लिटि ॥४०॥

का क्षतिर् इति । अनतितरस्तिमि अत्यन्तं तरो बलं रंहो वा येषां ते ऽतितरसो न विद्यन्ते अतितरसस् तिमयो मत्स्यविशेषा यस्मिंस् तादृशं तिमिनक्रादिरहितं कं जलम् एत्य प्राप्य धृतिभिर् धैर्यैः अस्तिं त्यागम् इताभिस् त्यक्तधैर्याभिः । यद्वा । धैर्यैः अस्तिमिताभिः अस्थगिताभिः चञ्चलाभिर् इत्य् अर्थः । ताभिः स्त्रीभिः अशाङ्कि शङ्कितम् अतर्की 'ति पाठे विचारितं किम् अतर्कि तदा "ह यत् यस्मात् । अस्तिं क्षेपणम् इताभिः प्राप्ताभिः तरङ्गक्षिप्ताभिर् इत्य् अर्थः मिताभिर् लघुपरिमाणाभिर् अद्भिः स्फुटम् प्रत्यक्षम् इयम् विहृतिः क्रीडा अतः का क्षतिर् अस्ति न का 'पी 'त्य् अर्थः । तिमिनक्रादिरहिते सरसि तासाम् भयकारणं स्वभावभीरुत्वम् एव । राजीवः शकुलस् तिमिः । तरसो बलरंहसी । कं शिरोऽम्बुनोर् इत्य् अमरः । शकि भये इत्य् अस्य चिणि लुङि ॥४१॥

अलिर् इति । अलिर् भ्रमरो मिलत्परागतो मिलन् उल्लसन् परागः कुसुमरेणुर् यस्मिंस् तादृशाद् अतः अस्मात् सरोरुहात् कमलात् परागतः परावृत्तः । अपराञ्च सम्मुखं तदीयं स्त्रीगणसम्बन्धिमुखम् मुदा हर्षेण रागतो ऽनुरागाद् आप प्राप्तवान् । सौरभाधिक्येन कमलं विहाय तन्मुखम् अशिश्रियद् इति भावः ॥४२॥

अथ कामानलिनीनां स्त्रीणां सङ्घैर् मनोरमा नलिनीनाम् ।
विधुततमा नलिनीनाम् पङ्क्तिर् वितनान सम्भ्रमान् अलिनीनाम् ॥४३॥
सरःश्रियो ऽन्तरं गतः सरोजनृत्तरङ्गतः ।
भयम् महत्तरं गतस् तनूजनस् तरङ्गतः ॥४४॥
अथ नीरात् सारसतः फेनपरीताद् यथा ऽम्बरात् सारसतः ।
अतिमुखरात् सारसतस् तीरम् इता स्त्रीततिश् चिरात् सा रसतः ॥४५॥

अथे 'ति । अथा 'नन्तरं कामानलिनीनां कन्दर्पानलयुक्तानां कामुकीनां नलिनीनां नलयुक्तानां नलः पतित्वेन अस्या अस्ती 'ति नलशब्दादिनिप्रत्ययः ततो ङीप् । स्त्रीणां सङ्घैः समूहैः नलिनीनां कमलिनीनाम् पङ्क्तिः विधुततमा 'त्यन्तं कम्पिता स्नानवशात् पद्मावचयाद् वा मनोज्ञा सुन्दरी अलिनीनाम् भ्रमरीणां सम्भ्रमान् भयध्वनीन् ततान नलसहितारामान्दोलिता कमलिनी भङ्गीकङ्कारान् अतनोद् इति भावः ॥४३॥

सर इति । सरःश्रियः सरोलक्ष्म्या अन्तरम् मध्यं स्वरूपत्वं वा गतः प्राप्तस् तनूजनः स्त्रीसमूहः सरोजनृत्तरङ्गतः सरोजानां कमलानां नृत्तं नर्तनं तस्य रङ्गतो रङ्गभूमेः । तरङ्गतः ऊर्मेर् महत्तरम् अतिशयेन महद् भयं साध्वसं गतो गतवान् । कमलनर्तनहेतुतरङ्गान् नक्रहतिकम्पशङ्कया स्त्रीजनो भीतो बभूवे 'ति भावः । अन्तरम् अवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये । छिद्रात्मीयविनावहिरवसरमध्ये ऽन्तरद् आत्मनि चे 'ति । लास्यं नृत्तं च नर्तने इत्य् अमरः ॥४४॥

अथे 'ति । अथ जलविहारानन्तरं सा स्त्रीततिः स्त्रीसमूहम् चिराद् बहुक्षणात् सारसतः सरसः इदं सारसं तादृशात् नीरात् जलात् तडागजलात् सारसतः सरसः इदं सारसं क्रीडनं ततस् तद् विहाय ल्यब् लोपे पञ्चमी । नीरात् कथम्भूतात् । रसतः सारसतः अतिमुखरात् रसतः शब्दायमानात् सारसतः सारसपक्षिविशेषाद् धेतोः अतिमुखराद् अतिवाचालात् । फेनपरीतात् फेनव्याप्तात् तीरं तटम् इता प्राप्ता । उत्प्रेक्षते अम्बरात् आकाशात् यथा अम्बराद् इवे 'त्य् अर्थः इवार्थे यथा । आकाशपक्षे सारसतः साराणि श्रेष्ठानि सन्ति नक्षत्राणि यस्मिंस् तादृशात् । फेनपरीतं जलं नक्षत्रवदाकाशप्रायं यथा गगनतलाद्

स चो ऽदयावलीनतः समुत्प्रभावली ऽनतः ।
नयन् ययाव् अलीन् अतः पदं जनो बलीनतः ॥४६॥
दिश कामान् अङ्गे ऽहम् मन्यो मदनेषु विकृतिमान् अङ्गे ऽहम् ।
इति परमानङ्गेहं नलः प्रियाम् अनयद् अतिविमानं गेहम् ॥४७॥
अरुणमहस्ते ऽनेन प्रापि च सो ऽब्जैर् गुणग्रहस् तेने न ।
भाव्यम् इह स्तेनेन स्फुटम् अस्य हि तद्गते ऽंशुहस्ते ऽनेन ॥४८॥

अप्सरसो ऽवतरन्ति एवं जलात् स्त्रियो ऽवतेरुर् इति भावः । सत्ये साधौ विद्यमाने प्रशस्ते ऽभ्यर्हिते ऽपि सत् । व्योम पुष्करम् अम्बरम् । सारो बले स्थिरांशे च इत्य् अमरः । रसत इति रस शब्दे इत्य् अस्मात् शत्रंतः ॥४५॥

स चो 'दये 'ति । स च जनः स्त्रीसमूहः बलीनतस् त्रिबलीभिर् आनतः नम्रः अलीन् भ्रमरान् नयन् गात्रादिसौगन्ध्येना ''कर्षयन् अतः सरस्तीरात् पदं स्वस्थानं ययौ । कथम्भूतम् पदम् उदयावलीनतः उदयाचलप्राप्तात् । यद्वा । उदयम् प्राप्य अवलीनात् निमग्नात् इनतः सूर्यात् समुत्प्रभावलि सम्यग् उद्गताः प्रभावलयः प्रभाश्रेणयो यस्मिंस् तादृशं सूर्ये ऽस्तम् उपयाति स्त्रीजनो गृहं गतवान् इत्य् अर्थः । पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु इत्य् अमरः ॥४६॥

दिशे 'ति । हे अङ्ग प्रिये दमयन्ति अहम् अङ्गे शरीरे मदनेषु विकृतिमान् कामशरविकारवान् अस्मि । कथम्भूतः । इहम् मन्यः इं कामं हन्ती 'ति इहः इहं कामहन्तारम् आत्मानम् मन्यते इहम् मन्यः अतः कामान् अभिलाषान् दिश देहि रत्यभिलाषम् पूरय । इत्य् अनेन प्रकारेण नलः प्रियां गेहं गृहम् अनयत् अनैषीत् । कथम्भूतं गेहम् । परमानङ्गेहम् परमा उत्कृष्टा 'नङ्गस्य कन्दर्पस्य ईहा चेष्टा वाञ्छा वा यस्मिन् भित्तिलिखितनानाकामचेष्टं कामोद्दीपनं वा । अतिविमानम् अतिक्रान्तं विमानम् पुष्पकादि येन तत् तिरस्कृतं देवयानम् इत्य् अर्थः । अनयद् इति णीञोलङि ॥४७॥

अरुणे 'ति । इनेन रविणा अरुणमहस्ता अरुणतेजस्त्वम् प्रापि प्राप्ता सन्ध्यारागारुणो रविर् अभूत् स च गुणग्रहो गुणग्रहणम् अब्जैः कमलैर् न तेने न विस्तारितः । इह सन्ध्यासमये अस्य हि सूर्यस्य तद्गते कमलगते अंशुहस्ते किरणहस्ते

यतो यतो यतो यतो रवेर् मरीचिसञ्चयः ।
महान्धकारसञ्चयस् ततस् ततस् ततस् ततः ॥४९॥
छादितरविता ऽनेन प्रापि च कालेन सस्वरवितानेन ।
जितरुचिरवितानेन व्योम्ना च स्फुरितम् उडुभिर् अवितानेन ॥५०॥
अथो ऽयतो ऽम्बुराजतः श्रियं खम् आप राजतः ।
यथा घटो व्यराजत स्मराग्रगः स राजतः ॥५१॥

सति अनेन रविना स्तेनेन चौरेण स्फुटं व्यक्तम् भाव्यम् । सन्ध्यारागारुणे सूर्ये कमलानाम् आरुण्यं ना ऽभूत् । यतः कमलगते रविकरे सति सायङ्काले स्वकरद्वारा तद्रक्ततां रविर् अपहरिष्यती ऽति भावः । महस्य् चो ऽऽवतेजसोर् इति तेने तनोतेर् लिटि ॥४८॥

यत इति । यतो यस्माद् धेतो रवेर् मरीचिसञ्चयो रविकिरणसमूहो यतो यतो यस्माद् यस्मात् स्थानात् यत उपरतः यम् उपरमे धातोः रूपम् । ततस् तस्माद् धेतोस् ततस् ततस् तत्र तत्र महान्धकारसञ्चयो महान्धकारसमूहस् ततः व्याप्तः । यतो यतो देशाद् रविकिरणा निवृत्तास् तत्र तत्र महान्धकारो व्यापद् इति भावः ॥४९॥

छादिते ऽति । अनेन कालेन सायङ्कालेन छादितरविता आच्छादितः पिहितो रविर् यस्मिन् सः तस्य भावस् तत्ता सा प्रापि प्राप्ता । कथम्भूतेन । सस्वरवितानेन सस्वराः सशब्दाः वीनाम् पक्षिणां ताना विस्तारा यस्मिंस् तादृशेन सशब्दपक्षिसमूहविशिष्टेने ऽत्य् अर्थः । एवं जितरुधिरवितानेन जितरुधिरसमूहेना ऽत्यन्तम् आरक्तेने ऽत्य् अर्थः । एवम् अवितनेन अवीनाम् मेषाणां वितानो विस्तारो यस्मिंस् तेन । यद्वा । न विद्यते वितानो यज्ञो यस्मिंस् तेन । सन्ध्यायां सप्त वर्जयेद् इति स्मृतेः । च पुनर् व्योम्ना आकाशेन उडुभिः करणेन स्फुरितं शोभितम् । यद्वा जितरुचिरवितानेने ऽति पाठे व्योम्ना इत्य् अस्य विशेषणं जितः अतिरुचिरो वितान उल्लोचो येन इत्य् अर्थः । क्रतुविस्तारयोर् अस्त्री वितानं त्रिषु तुच्छके । तारका ऽप्य् उडु वा स्त्रियाम् इत्य् अमरः ॥५०॥

अथे ऽति । अथा ऽनन्तरम् अम्बुराजत उदधेः सकाशात् उद्यतः उद्गतः स चन्द्रो व्यराजत शुशुभे । खम् आकाशं राजतम् चन्द्रात् श्रियम् आप प्राप । यथा स्मरा-

दधतं कालं कालङ्कालङ्कालं वियोगिनी शशिनं तम् ।
अध्वगकालं कालं कालं का लं समीक्षितुम् प्रोद्यन्तम् ॥५२॥
क्षरत्तुषारशीकराः प्रबुद्धकैरवाकराः ।
ततो जजृम्भिरे करा जगत्सु शार्वरीकराः ॥५३॥
वधूस् तदा 'नुनिन्यिरे नयेन येन येन ये ।
वशं नरो ऽनयन् समुन्नतेन तेन तेन ते ॥५४॥

अगः कामप्रोवर्तो राजतो रूप्यमयो घटः शोभते । यथाशब्द इवार्थे । उदधेर् उत्थितम् चन्द्रो मदनभूपप्रस्थानाभिषेकरूप्यकलश इव राजे 'ति तात्पर्यम् । श्वेतरूप्ये ऽपि रजतं हेम्नि रूप्ये सिते त्रिषु । व्यराजते 'ति राजतेर् लङि ॥५१॥

दधतम् इति । का वियोगिनी विरहिणी तं शशिनं समीक्षितुं द्रष्टुम् अलं समर्था न का 'पी 'त्य् अर्थः । कथम्भूतम् । कालं कृष्णावर्णं यत् कालङ्कालङ्कालं कलङ्क एव कालङ्कः स चा 'सौ अलङ्कालो ऽलङ्कारो । रलयोर् ऐक्याद् यमके न दोषः । तं दधतं धारयन्तम् । अध्वगकालम् अध्वगानाम् पथिकानां कालं नाशकम् । एवं कालं कालं काले काले रात्रौ रात्रौ प्रोद्यन्तम् प्रकर्षेणो 'द्यन्तम् । कृष्णो नीलासितश्यामकालश्यामलमेचकाः । कालं कालम् अतिनित्यवीप्सयोर् इति द्विर्वचनम् । कालाध्वनोर् अत्यन्तसम्योगे इति द्वितीया ॥५२॥

क्षरद् इति । ततो ऽनन्तरं क्षरत्तुषारशीकराः क्षरन्तः स्रवन्तस् तुषारशीकरास् तुहिनजलकणा येभ्यस् तादृशाः । एवम् प्रबुद्ध उत्फुल्लः कैरवाकरः कुमुदसमूहो येभ्यस् तादृशाः शार्वरीकराश् चन्द्रसम्बन्धिनः शर्वरीकरश् चन्द्रः तस्ये 'दम् इत्य् अण् । कराः किरणा जगत्सु लोकेषु जजृम्भिरे विजृम्भिताः । बलिभागांशवः कराः । जजृम्भिरे इति जृभिं विनामे विकाशे चे 'त्य् अस्मात् लिटि ॥५३॥

वधू इति तदा चन्द्ररश्मिपातानन्तरं ये नराः ये पुरुषाः येन येन नयेन यया यया नीत्या उपायेन वधूः कामिनीर् अनुनिन्यिरे ऽनुनीतवन्तः । ते पुरुषा समुन्नतेन समृद्धेन तेन तेनो 'पायेन वशं स्वाधीनताम् अनयन् अनैषुः । येन येनो 'पायेन पादानत्या स्त्रियो ऽवशा वशम् आगताः तेनै 'व वशं चक्रुर् इति भावः ॥५४॥

सद्भासद्भावम् आदरैः सद्धा सद्धाः स्मरस्य ते ।
सरासुरा यथा मृते सुरासु रागम् आदधुः ॥५५॥
मधु प्रपीय चा ऽभवन् नता नता नता नताः ।
रमा रम् आर मारमाकुले ऽने ऽत्र हालया ॥५६॥

सद्वे ऽति । स्मरस्य कामस्य असद्या असहिष्णवस् ते कामुकजनाः सद्वासद्वावं हासहा-
वादिभावसहितं यथा स्याद् एवम् आदरैः सह सादरं सुरासु मधुषु रागम्
पानानुरागम् आदधुर् दधिरे । अनन्तरं कामुकजना हावादिसहितं सुराम्
पपुर् इति भावः । यथा सुरासुरा देवासुरा अमृते रागं कुर्वन्ति । सुरा हलि-
प्रिया हाला परिस्रुद् वरुणात्मजा । आदधुर् इति दधातेर् लिटि । यच् चो
ऽक्तम् भरतेन ।

अलङ्कारस्वभावैर् ज्ञेया भावा रसाश्रयाः ।
यौवने ऽभ्यधिकाः स्त्रीणां विकारा वक्त्रगात्रजाः ॥१॥
देहात्मकम् भवेत् सत्त्वं सत्त्वाद् भावः समुत्थितः ।
भावात् समुत्थितो हावो हावाद् धेला समुत्थिता ॥२॥
लीला विलासो विच्छित्तिर् विभ्रमः किलकिञ्चितम् ।
मोट्टायितं कुट्टमितं विब्बोको ललितं तथा ॥३॥
विहृतं चे ऽति विज्ञेया दश स्त्रीणां स्वभावजाः ।
प्रियस्या ऽनुकृतिर् लीला श्लिष्टावाग्वेषचेष्टितैः ॥४॥
विलासो ऽतिविशेषो ऽस्ति प्रियाया वासनादिषु ।
मण्डनाङ्काद् अनन्यासो विच्छित्ती रूपदर्शितः ॥५॥
चित्तवृत्त्यनवस्थानं शृङ्गाराद् विभ्रमो मतः ।
हर्षाद्रुदितगीतादि व्यामिश्रं किलकिञ्चितम् ॥६॥
मोट्टायितम् प्रियं स्मृत्वा साङ्गभङ्गादिजृम्भणम् ।
दुःखोपचारः सौख्ये ऽपि हर्षात् कुट्टमितम् मतम् ॥७॥
विब्बोको ऽभिमतप्राप्ताव् अपि गर्वाद् अनादरः ।
अनाचार्योपदिष्टं स्याल् ललितं रतिचेष्टितम् ॥८॥
वक्तव्यभाषणं व्याजाद् विहृतं दर्शितेङ्गितम् ॥५५॥

मध्व् इति । मधु प्रपीय मधु मद्यम् प्रपीय पीत्वा तास् ताः स्त्रियः नता नम्रा

भ्रमरैर् द्राग् ग्रस्तानि प्रपीय च मधूनि सानुरागस् तानि ।
दत्तनिरागस्तानि प्रापच् छयनं जनस् त्वरागस् तानि ॥५७॥
अदूरवस्थितैः प्रियैः सुदूरवल्लकाः कृताः ।
तदूरवस् चकासिरे मृदूरवः क्षता नखैः ॥५८॥

अनता अनम्राश् च ना ऽभवन् अपि त्व् अभवन् । या याः पूर्वं नम्रास् तास् ता मधुपाने कृते ऽनम्रा अभवन् । या या अनम्रास् तास् ता मधुपाने कृते नम्रा अभवन् । मारमाकुले मारः कन्दर्पस् तस्य मा लक्ष्मीः कन्दर्पशोभा तया आकुले ऽत्र जने हालया सुरया कारणेन रमा श्रीः अरं शीघ्रम् एव आर प्राप्तवती । सुरापानात् स्त्रीजने ऽन्यै ऽव काचन शोभा ऽभूद् इति तात्पर्यम् । प्रपीये ऽति । पीङ् पाने ऽस्य रूपम् पिबतेस् तु प्रपीये ऽति भवितव्यम् । अभवन् इति भवतेर् लङि आरे ऽति अर्तेर् लिटि । मधु मद्ये मधु क्षौद्रे मधु पुष्परसे विदुः । यद्वा । पूर्वश्लोकोक्तास् ते कामिजनाः च पुनः मधु आसवम् प्रपीय पीत्वा अतानतानतानताः अभवन् अतानम् अक्षरम्यूर्न्यं यत् तानं गानमूर्छनाविशेषः तस्य भावस् तत्ता तस्याम् आनताः परायणाः सुराम् पीत्वा गानोत्सुका अभवन् इत्य् अर्थः अत्र वसन्ते जने कामिजने अथवा अत्र जने अस्मिन् कामिजने हालया मदिरया आकुले मत्ते सति रमा शोभा मारं कामम् अरम् अत्यर्थं आर प्राप मदिरापानेन कामो विजृम्भित इत्य् अर्थः ॥५६॥

भ्रमैर इति । सानुरागः सस्नेहः । एव त्वरागः त्वरया वेगेन गच्छती ऽति त्वरागः जनः कामुकलोको दत्तनिरागस्ता निरपराधता यैस् तादृशानि विस्मारितापराधानि । भ्रमैर् भृङ्गैश् चषकोपरिस्थितैर् द्राक् झटित्य् ग्रस्तानि त्यक्तानि मधूनि मद्यानि प्रपीय पीत्वा शयनम् पर्यङ्कं च प्रापत् अशिश्रियत् । कीदृशं शयनम् । तानि तानो विस्तारो वितानो वा ऽस्या ऽस्ती ऽति तानि । सुरतार्थम् इति भावः ॥५७॥

अदूरे ऽति । अदूरवस्थितैर् अदूरे निकटे वस्थितैः प्रियैर् भर्तृभिः सुदूरवल्लकाः कृताः सुदूरे वस्त्रं येषां तास् तादृशाः कृता विहिताः । तदूरवस् तासां स्त्रीणाम् ऊरवः ऊरुदेशाः मृदूरवः मृदवः कोमलाश् च ते उरवो विपुलाः पीनाश् च कोमला विपुलाः । नखैः क्षता भिन्नाश् चकासिरे शुशुभिरे सुरतसमये प्रियकरहृतवसनाः कोमलाः स्त्रीणाम् ऊरवो रेजुर् इति भावः । वस्थितैर् इति वष्टिरल्लोपे

ससमुद्रमहेलाभिस्फुरितगुणाभिस् ततः स्मरमहे ऽलाभि ।
श्रीः प्रवरमहेलाभिस् तथै 'व युवपङ्क्तिभिः परमहेलाभिः ॥५९॥
इह मणितारावलयश्रित इव नृत्ये कृतावतारा बलयः ।
वक्षसि तारा वलयस्वना निपेतुश् च हारतारावलयः ॥६०॥

'त्यादिना 'ह्लोपः । बहुव्रीहित्वात् कः । सक्थि क्लीबे पुमान् ऊरुः । कोमलम् मृदुलम् मृदु । वशेरुविपुलम् पीनम् इत्य् अमरः । चकासिरे इति कास् दीप्तौ इत्य् अस्य लिटि रूपम् ॥५८॥

ससे 'ति । ततो ऽनन्तरं ससमुद्रमहेलाभिस्फुरितगुणाभिः । ससमुद्रा ससागरा महती दीर्घा या इला भूमिस् तस्याम् अभिस्फुरिताः श्रुता गुणा यासां ताभिः । परमहेलाभिः परमा उत्कृष्टा हेला लीला यासां ताभिः प्रबलमहेलाभिः प्रचुरस्त्रीभिः स्मरमहे कान्दर्पोत्सवे श्रीः शोभा सुखं वा अलाभि प्राप्ता । तथै 'व तेन प्रकारेण युवपङ्क्तिभिस् तरुणश्रेणिभिः श्रीः प्राप्ता । यद्वा । ताभिः करणेन सह वा युवपङ्क्तिभिः शोभा प्राप्ता । उभयत्रा 'पि विशेषणम् । अलाभी 'ति डुलभष् प्राप्तौ इत्य् अस्य लुङि चिण् भावकर्मणोर् इति च्लेश्चिणिकृते लभेश् चे 'ति नित्यं नुमिप्रसक्ते विभाषा चिण्णमुलोर् इति नुमागमाभावे वृद्धौ रूपम् । महती इला महेला गोभूवाचस् त्व् इडा इलाः । महेला महिला 'पि चे 'ति द्विरूपकोषः ॥५९॥

इहे 'ति । विपरीतरतिं वर्णयन्न् आह । मणितारावलयश्रिते मणिते सुरतकूजिते आरावः शब्दस् तस्य लयः साम्यं तेन श्रिते गीतवाद्यादिसाम्ययुक्ते इह रते नृत्ये इव नाट्य इव बलयः त्रिबलीभङ्गाः कृतावताराः कृतो ऽवतारो ऽवतरणं याभिस् तादृश्यो ऽभवन् उपरि सुरते ऽत्यासक्त्या बलयो ना 'दृश्यन्ते 'ति यावत् । वलयस्वनाः कङ्कणकणकणत्कारास् च तारा अत्युच्चा अभवन् । हारतारावलयः हारस्य ताराः शुद्धमौक्तिकानि तेषां श्रेणयश् च प्रियवक्षसि निपेतुश् चस्खलुर् इत्य् अर्थः । यद्वा । हारेषु यस् तारावलिर् यष्टिविशेषः ते वक्षसि प्रियोरसि निपेतुः रतिसम्भ्रमात् त्रुटितहारयष्टयः प्रियोरसि निपतिता इत्य् अर्थः । सप्तविंशतिमौक्तिका यष्टिस् तारावलिर् नक्षत्रमाला । सै 'व नक्षत्रमाला स्यात् सप्तविंशतिमौक्तिकैर् इत्य् अमराद् इत्य् अर्थः । नृत्ये ऽपि पात्राणाम् अवतरणं तज्जारादित्रुटनं कङ्कणक्वाणादि भवति लयः साम्यम् अथा 'स्त्रियाम् ।

तया ऽऽर्द्रधीर् अमायया मुदाम् अनारमायया ।
नलो विहारम् आययाव् अधः कृता रमा यया ॥ ६१ ॥
सा ऽशङ्का ऽमाया ऽऽसीत् कृतिनी भैमी नलस्य कामाया ऽऽसीत् ।
कामनिकामायासी द्युतिं तदिष्टां स चा ऽधिकाम् आयासीत् ॥ ६२ ॥

मणितं रतिकूजितम् । बलिः प्राण्यङ्गजे स्त्रियाम् इत्य् अमरः । अभवन्न् इति भवतेर् लङि । तारो ऽत्युच्चैस् त्रयस् त्रिषु । कटकं वलयो ऽस्त्रियाम् । मुक्ताशुद्धौ च हारः स्यात् । निपेतुर् इति पततेर् लिटि ॥ ६० ॥

तये ऽति । आर्द्रधीः शृङ्गारस्निग्धबुद्धिर् नलो मुदां हर्षाणाम् अनारमायया आरमो विरतिस् तद्रहितः अनारमः अयः शुभावहविधिर् यस्यास् तादृश्या हर्षाविरतभाग्यये ऽत्य् अर्थः । अमायया मायारहितया तया दमयन्त्या सहितो नलो विहारं क्रीडाम् आययौ आगमत् । यद्वा । या दमयन्ती मुदां हर्षाणाम् अनारमाय अविश्रामाय भवति । तया सह नलो विहारम् आययौ । यया रमा लक्ष्मीर् अधः कृता रूपेण सौभाग्येन वा लक्ष्मीतो ऽप्य् अधिका तादृश्या दमयन्त्या नलो विजहारे ऽति भावः । आययाव् इति यातेर् लिटि ॥ ६१ ॥

से ऽति । सा भैमी अशङ्का शङ्कारहिता कृतिनी निपुणा पुण्यवती वा ऽमाया निर्व्याजा आसीद् अभूद् इत्थम् अनेन प्रकारेण नलस्य कामाय अभिलाषाय आसीद् उज्जगाम । नलकामम् अपूपुरद् इत्य् अर्थः । कामनिकामायासी कामेन मन्मथेन निकामम् अत्यर्थम् आयासी आयासः परिश्रमो यस्य तादृक् स च नलम् च तदिष्टां दमयन्तीप्सिताम् अधिकां द्युतिं क्रीडाम् आयासीत् आगतः । दमयन्तीरतावसरे निर्व्याजा ऽशङ्का नलस्या ऽभिलाषाय बभूव नलम् च दमयन्तीमनोऽभिलषितं समपूरयद् इति परस्परसोत्कर्षो ऽभूद् इति भावः । आसीद् इत्य् अस्तेर् एकं लङि । अपरम् अपि अस गताव् इत्य् अस्य लुङि । आयासीद् इति यातेर् लुङि । यद्वा । भैमी कथम्भूता साशङ्का सभया प्रोढरात्रित्वात् स्त्रीस्वभावत्वाच् च पुनः अमाया निःकपटा पुनः सीत्कृतिनी सीत्कारवती । यद्वा । साशङ्कामायासीत्कृतिनी ऽत्य् एकं विशेषणम् आशङ्कासहिता या माया कापट्यं तया सीत्कृतिनी भयच्छलेन सीत्कारवती । यद्वा । मायया छलेन सीत्कृतिनी नलस्य कामाय मनोरथसिद्ध्यै आसीत बभूवे ऽत्य् अर्थः ॥ ६२ ॥

इति नानामायानां नलः कलिभुवां बलेन नामा 'यानाम् ।
व्यसनानाम् आयानान् निधिर् अरमद् राज्यजन्मनाम् आयानाम् ॥६३॥
स्वयंवराद् अनन्तरम् मही महीम् अहीनधीः ।
ररक्ष नैषधम् तदा रराज राजराजराः ॥६४॥

इति श्रीकालिदासकृते नलोदये सत्काव्ये द्वितीयोच्छ्वासः

॥ २ ॥

इती 'ति । इत्य् अनेन प्रकारेण नलो नैषधः नानामायानां नानाविधा माया व्याजानि येषु तादृशानां कलिभुवां कलेर् भवन्ती 'ति कलिभुवः कलिजनितास् तेषां व्यसनानां विपदाम् आयानाद् आगमनपर्यन्तम् आगमनावधेः अरमत् अक्रीडत् । कथम्भूतः । बलेन कारणेन राज्यजन्मनां रज्ये जनपदे जन्म येषां तादृशानाम् आयानां धनागमनानां निधिर् निधानम् आधार इति यावत् अभवद् इति पाठे । नानादम्भकलिजनितापत्त्यागमनावधि नलो राज्यश्रीभाजनम् अभूद् इति भावः । अयः शुभावहो विधिः । अभवद् इति भवतेर् लङि ॥६३॥

स्वयम् इति । तदा तस्मिन् काले नैषधो नलः स्वयंवराद् अनन्तरं स्वयंवरात् परतः महीम् भुवं ररक्षा 'पालयत् । कीदृशः । मही सोत्सवः पुनः अहीनधीः विशालबुद्धिः । राजराजराः । राजराजः कुबेरस् तस्ये 'व रा धनं यस्य तादृशः सन् रराज शुशुभे । स्वयंवरोत्तरम् भुवम् अरक्षन् नलः कुबेरप्रायसम्पच् चा "सीद् इति भावः । राजराजो धनाधिपः । अर्थरैविभावा अपी 'त्य् अमरः । रराजे 'ति राजतेर् लिटि ॥६४॥

इति श्रीनलोदयकाव्यटीकायां सुबोधिन्यां द्वितीयोच्छ्वासः

॥ २ ॥

॥ इति पूर्वार्धः ॥

अथ सुरवृषभाः स्वर् अतः प्रेक्ष्य कलिम् प्रस्थिता महाद् भास्वरतः ।
यः कृतिषु शुभास्व् अरतः पप्रच्छुस् तद्गतिं घननिभाः स्वरतः ॥१॥
यशसाम् आयामितया हृतः श्रिया भीमदुहितृमायाम् इतया ।
तदधिगमाया मितया स्पृहया ऽद्य मनुष्यलोकम् आयामि तया ॥२॥
इति विकलोमायायास् तदुक्त ऊचे जनो ऽमलो ऽमायायाः ।

अथे 'ति । अथ स्वयंवराद् अनन्तरम् अतो ऽस्माद् भास्वरतो देदीप्यमानान् महात् स्वयंवरोत्सवात् स्वः स्वर्गम् प्रस्थिताः प्रचलिताः सुरवृषभाः सुरोत्तमा इन्द्राद्याः कलिम् प्रेक्ष्य तद्गतिं तस्य कलेर् गतिं गमनम् पप्रच्छुः । यः कलिः शुभासु कृतिषु कार्येषु अरतः न रतः विरत इति यावत् । कीदृशाः सुरोत्तमाः । स्वरतः कण्ठध्वनेः घननिभाः घनो मेघस् तत्सन्निभाः । कलिविशेषणं वा । दमयन्तीस्वयंवरात् स्वर्गं गच्छन्तो देवा मध्ये कलिं दृष्ट्वा कुत्र गच्छसी 'ति तद्गमनम् पृष्टवन्त इति भावः । स्युर् उत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः । मह उद्धव उत्सव इत्य् अमरः । पप्रच्छुर् इति प्रच्छधातोर् लिटि ॥१॥

यशसाम् इति । देवैर् गमनम् पृष्टः कलिर् आह । यशसाम् आयामितया कीर्तीनां दैर्घ्यवत्तया अतियशस्विन्या । इन्नन्तात् तल् । भीमदुहितृमायाम् भीमस्य राज्ञो दुहिता पुत्री दमयन्ती तन्मायां तद्व्याजम् इतया गतया तया श्रिया लक्ष्म्या हृत आहृतचित्तः तदधिगमाय दमयन्तीरूपलक्ष्मीलब्धये ऽमितया ऽसङ्ख्यया बहुतरया स्पृहया इच्छया ऽद्या ऽस्मिन् वर्तमानदिने मनुष्यलोकम् आयामि गच्छामि । आत्मजस् तनयः सूनुः सुतः पुत्रः स्त्रियां त्व् अमी । आहुर् दुहितरं सर्वे इत्य् अमरः । आयामी 'ति यातेर् लटि ॥२॥

इती 'ति । इत्य् अनेन प्रकारेण तदुक्तस् तेन कलिनो 'क्तो भाषितः अमलो निर्मलः

6*

शुभशीलो मा यायाः स्थितो नलो ऽस्या वरो ऽनुलोमायायाः ॥३॥
वच इति वस्वादिभ्यः श्रुत्वा कलिर् उत्सवासवस्वादिभ्यः ।
मखसर्वस्वादिभ्यश् चुकोप दोषात् स मदभुवः स्वाद् इभ्यः ॥४॥
प्रबलतमान् अबलतया संयोज्य नले सुरोत्तमान् अवलत या ।
तेना 'मा नवलतया तरुणे 'व तया 'स्यतां न मानबलतया ॥५॥

अमरो वा रलयोर् ऐक्यात् जनो देवलोक ऊचे ऽकथयत् । किम् अकथयद् इत्य् आह । अमायाया निर्व्याजायाः अस्याः दमयन्त्याः शुभशील उत्तमस्वभावो नलः वरः स्थितः वरः प्रसिद्धः । कीदृश्याः । विकलोमायायाः विकलो दीनः उमाया पार्वत्या अयः शुभावहो विधिर् यया तादृश्याः पार्वत्युत्तमभाग्यायाः । कीदृश्याः । अनुलोमायायाः अनुलोमः अनुकूल अयः शुभादृष्टं यस्याः तस्याः । मा यायाः मा गच्छ । दमयन्त्या नलो वृतस् त्वम् मा गच्छे 'ति भावः । यद्वा । मायाया दम्भतः छुद्मितो वा विकलः सन् त्वम् मा गच्छे 'त्य् अर्थः । यद्वा । देवलोकविशेषणम् । माया शाम्बरी कृपा । दम्भो छद्मम् चे 'ति हेमः ॥३॥

वच इति । स कलिर् उत्सवासवस्वादिभ्यः उत्सवलक्षणो य आसवो मधु तत्स्वादिभ्यः पीतवद्भ्यः । मखसर्वस्वादिभ्यः । मखस्य यज्ञस्य सर्वस्वं यज्ञधनं सोमम् अत्तुं शीलं येषां ते तादृग्भ्यो वस्वादिभ्य इन्द्रादिदेवेभ्यः इत्युक्तप्रकारं वचः वचनं श्रुत्वा मदभुवः मदात् दर्पात् भवती 'ति मदभूः तस्माद् इति दोषविशेषणं स्वात् स्वकीयाद् दोषाद् दूषणाच् चुकोप क्रुद्धो ऽभूत् कलिः कथम्भूत इभ्यः आढ्यः । मध्व् आसवो माधवकः । सप्ततन्तुर् मखः क्रतुः । कुप कोपे अस्माल् लिटि । स्वं ज्ञाताव् आत्मनि स्वं त्रिष्व् आत्मीये स्वो ऽस्त्रीयां धने । इभ्य आढ्यो धनी स्वामी 'त्य् अमरः ॥४॥

प्रबले 'ति । या दमयन्ती सुरोत्तमान् देवश्रेष्ठान् प्रबलतमान् उत्कृष्टबलान् अबलतया अबलत्वेन संयोज्य विगणय्य मानबलतया अहङ्कारसामर्थ्येन नले ऽवलत नले ऽन्वरज्यत । यद्वा । तया किम्भूतया । मानवलतया मनुष्यरतया रलयोर् ऐक्यात् तया दमयन्त्या तेन नलेन अमा सह न आस्यतां न स्थीयताम् । कया केने 'व । नवलतया नवीनव्रतत्या तरुणे 'व वृक्षेणे 'व । या दमयन्ती देवान् असमर्थान् ज्ञात्वा नलम् अवरिष्ट सा नलेन सह वियुज्य-

इति बलवान् अन्तरतः कलिः किले 'तद् जगाद वानं तरतः ।
अवहितवान् अन्तरतः समृद्धिषु नलस्य विविशिवान् अन्तर् अतः ॥६॥
सो ऽथ सदारो दरतः पुष्करविजितो नलः सदा रोदरतः ।

ताम् इति शशापे 'ति भावः । यद्वा । प्रबलतमान् देवान् संयोज्य स्वयंवरम् आनाय्या 'बलतया स्त्रीत्वेन नले या 'नुरक्ते 'त्य् अर्थः । अबलाया भावो ऽबलता । त्वतलोर् गुणवचनस्ये 'ति पुंवद्भावः । यथा लता सुरवृक्षान् अबलतया असारत्वेन संयोज्य नले तुच्छतृणे वल्यते पश्चात् तेन सह तया क्षणाम् अपि न स्थीयते तथे 'त्य् अर्थः । लतया कथम्भूतया । मानबलतया माने विस्तारे बलता अतिशयो यस्यास् तये 'ति भावः । अमा सह समीपे च । आस्यताम् इत्य् आस उपवेशन इत्य् अस्य भावे लोटि ॥५॥

इती 'ति । इत्य् अनेन प्रकारेण बलवान् कलिर् एतत् पूर्वोक्तं शापवचनं जगाद किल निश्चये । अतः अनन्तरं अन्तरतः छिद्रतः छिद्रं अवकाशं वा प्राप्य ल्यब् लोपे पञ्चमी । यद्वा । अन्तरतः अन्तर्धानात् समृद्धिषु सम्पत्सु सत्सु । तदृद्धिष्व् इति पाठे पूर्वोक्तशापवचनवृद्धिषु इत्य् अर्थः । अवहितवान् सावधानः । वानं वनसमूहं तरतो गच्छतो नलस्या 'न्तः हृदयं विविशिवान् प्रविवेश । यद्वा । अन्तरतदृद्धिषु इति पाठे अवकाशशापदुःखबाहुल्येषु अवहितवान् सावधानः । यद्वा 'न्तरं विनाशं तनोती 'त्य् अन्तरतत् तादृशा वृद्धयः नलस्य ऋद्धयो धनागमास् तेषु । यद्वा 'न्तरतदृद्धिषु अन्तरं छिद्रं तदृद्धिषु छिद्रबाहुल्येषु सावधानः । अथवा 'न्तरतदृद्धिषु अन्तरे मध्ये तदृद्धिषु तस्य नलस्य वृद्धिषु धनागमेषु अवहितवान् यथा वृद्धिर् न भवती 'ति । पुनर् अन्तरतः नाशरतः । एवम्पूर्वोक्तं शापवचनं कलिर् उक्तवान् प्रवेशच्छिद्रान्वेषणसावधानम् च मृगयां गतस्य नलस्य हृदयम् अध्यास्ते 'ति भावः । अन्तरम् अवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये । छिद्रात्मीयविनावहिरवसरमध्ये ऽन्तर् आत्मनि च । अन्तो ऽध्यवसितौ मत्यौ स्वरूपे निश्चये ऽन्तिके । वानम् इति । तस्य समूह इत्य् अण् । विश प्रवेशन इत्य् अस्माल् लिटि क्वसौ कृते विभाषा गमहनविदविशाम् इति वसोर् इड्विकल्पः ॥६॥

सो ऽथे 'ति । अथ कलिप्रवेशानन्तरं दरोदरतः द्यूतसम्बन्धिनो व्याजात् कपटात् पुष्करेण भ्रात्रा विजितः पराजितः स नलः दरतः भयात् पीडया वा उदरोद-

व्याजाद् दारोदरतः स्वपुरान् निर्यातवान् उदारोदरतः ॥७॥
असमानान् आहा ऽरिः स्मै ऽनं शब्दांश् च किम् अमुना ना ऽहारि ।
अपि तेना ऽनाहारि भ्रान्तम् भूषणाम् अपास्य नानाहारि ॥८॥
शुचम् अकरोद् अन्यस्य भ्रमन् नलः पथि पदं सरोदं न्यस्य ।
न च पुनर् ओदन्यस्य त्राणाया ऽभूत् परम् परोदन्यस्य ॥९॥

रतः उदारं विशालम् उदरम् मध्यं यस्य तादृशात् स्वपुरात् स्वगृहान् नगराद् वा सदारः दारा दमयन्ती तया सहितो निर्यातवान् निरगमत् । यद्वा । राज्य-भ्रंसानन्तरं कलिसङ्क्रमणात् नलस्य जलोदरं जातम् इति पुराणवार्ता । व्रहद् उदरहेतोर् इत्य् अर्थः । कीदृशः । सदा सर्वदा रोदे अश्रुक्षरणे रतो ऽनुरक्तः । रुदन्न् इति यावत् । दरोदरजोदरे इति वैजयन्ती । तस्ये ऽदम् इत्य् अप् पञ्चम्यास् तसिल् । अगारे नगरे पुरः । दरो ऽस्त्रियाम् भये श्वभ्रे । उदारो दातमहतोर् इत्य् अमरः ॥७॥

असे ऽति । अरिः शत्रुः पुष्करो रिपुर् एव वा एनं नलम् असमानान् अनुचितांश् च शब्दान् वाणीर् आह स्म भर्त्सनवचनान्य् अशिश्रवद् इत्य् अर्थः । अमुना नलेन किं वस्तु ना ऽहारि न हारितम् । यद्वा । अमुना पुष्करेण अस्य नलस्य सम्बन्धि किं वस्तु न अहारि अपि तु सर्वम् एव हृतम् इत्य् अर्थः । तेन नलेन हारि मनोज्ञं नाना बहुविधम् भूषणम् अलङ्कारं हारकुण्डलकेयूरादिकम् अपास्य त्यक्त्वा अनाहारि आहारस्या ऽभावो ऽनाहारः सो ऽस्या ऽस्ती ऽत्य् अस्मिन्न् इति तादृशम् आहाररहितं यथा स्याद् एवम् भ्रान्तं वनेषु भ्रमितम् । द्यूते पुष्करविजितो नलो भूषणम् अपास्य वने बभ्रामे ऽति भावः । अहारी ऽति हृञोलुङिचिणि ॥८॥

शुचम् इति । पथि मार्गे सरोदं रोदनं रोदस् तेन सहितं साश्रु । यद्वा । स नलः रुदन् रोदनं कुर्वन् पदं चरणं न्यस्य निक्षिप्य भ्रमन्न् अटन् अन्यस्य प्रेक्षकस्य पुष्करस्य वा शुचं शोकम् अकरोद् अकार्षीत् । च पुनः अस्य नलस्य परोदन्यस्य परा उदन्या पिपासा यस्य तादृशस्य ओदन्यस्य ओदनार्हस्य परम् अन्यद् अन्नजलादिना त्राणाय रक्षणाय ना ऽभून् ना ऽभवत् । नलः कण्टकवति मार्गे कोमलचरणतया रुदन् परिभ्रमन् सर्वेषां शोकम् अकरोत् । क्षुत्पिपासया ऽस्य

ना 'स्य रमा ना ''वासस् तच् च खगा जह्रुर् अर्थ्यमाना वासः ।
अपि मद्मानाव् आस स्वरोपजलधिं तरन् क्षमानावा सः ॥१०॥
तापशतेन वसा नौ द्रवेद् इती 'मौ नगावृते ऽनवसानौ ।
चेलान्तेन वसानौ चेरतुर् एकेन पर्वते नवसानौ ॥११॥

रक्षणाय कोऽपि ना 'भून् निराहार एवा ''सीद् इत्य् अर्थः । मन्युशोकौ तु शुक् स्त्रियाम् । पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु । उदन्ये 'ति तद् अर्हती 'ति यः । अशनाया बुभुक्षा क्षुद् ग्रासस् तु कवलार्थकः । उदन्या तु पिपासा तृट् इत्य् अमरः । अभूद् इति भुवो लुङि ॥९॥

ना 'स्ये 'ति । अस्य नलस्य न रमा लक्ष्मीर् न आवासो गृहम् आच्छादनं वा आसीद् इत्य् अध्याहारः । तच् च वासः तस्य वस्त्रम् अर्थ्यमाना क्रीडार्थम् आहो 'ति दमयन्त्या याच्यमानाः खगाः कलिमायाविर्भूता हंसा जह्रुः । दमयन्तीपरिहितवस्त्रैकदेशम् परिधाय हंसजिघृक्षया स्ववस्त्रं तद् उपरि क्षिप्तं तद्वस्त्रं गृहीत्वा हंसा ययुः इति पुराणवार्ता । स नलः क्षमानावा शान्तिनौकया स्वरोपजलधिं स्वक्रोधसमुद्रं तरन् उल्लङ्घयन् मदं गर्वम् मानम् अभिमानम् आस चिक्षेप । लक्ष्मीः स्थलं वा 'स्य ना ''सीत् कुत्रा 'पि न स्थितवान् इत्य् अर्थः । पथि च तद्वासो गृहीत्वा पक्षिणो गताः असौ च गर्वाभिमानाव् अत्याक्षीत् । आसे 'त्य् अस्तु क्षेपण इत्य् अस्य लिटि ॥१०॥

तापे 'ति । इमौ दमयन्तीनलौ तापशतेन तापाधिक्येन नौ आवयोर् वसा मेदो द्रवेत् शोष्यतो 'ति हेतोर् एकेन चेलान्तेन वसनखण्डेन वसानौ छादयन्तौ अनवसानौ न अवसानम् मृत्यु ययोस् तादृशौ नवसानौ नवं नूतनं सानु शृङ्गं यस्य तादृशे पर्वते नगैर् वृक्षैर् आवृते युते चेरतुश् चलितवन्तौ । अतिघर्मे एकेन पटान्तेना ''च्छादयन्तौ इमौ मरणरहितौ पर्वते चलिताव् इति भावः । नगावृते इत्य् अत्र सुखाद् ऋते इति पाठे सुखं विना 'पि अविनाशिनौ इत्य् अर्थः । स्नेहन् मेदस् तु वपा वसा । युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर् वांनावातिनौ इत्य् आदेशः । द्रवेद् इति द्रु गताव् इत्य् अस्य लिङि । शैलवृक्षौ नगाव् अगौ । स्नुः प्रस्थः सानुर् अस्त्रियाम् इत्य् अमरः । चेरतुर् इति चरतेर् लिटि ॥११॥

तद्वासः स्वापायां नीतिर् इयं चे 'ति विपदि सस्वापायाम् ।
निजवासःस्वापायान् निकृत्य ताम् अमुचद् इह स स्वापायाम् ॥१२॥
बभ्रामा 'नस्तेन श्रमेण कलिना विधूयमानस् तेन ।
स हि रिपुमानस्तेनः स्वभाग्यदोषाः क्व समहिमानस् ते न ॥१३॥
मृगकुलम् आरसद् आविश्रमम् अभितापातुरो ममार सदा विः ।
स्फुरिततमा रसदा विस्तृता नगा यत्र विपिनम् आर स दावि ॥१४॥

तद्वास इति । स नलः कलिच्छन्नबुद्धित्वात् विपदि विपत्तौ इयम् एव नीतिर् इति मत्वा तां दमयन्तीं स्वापायां स्वापम् आयातो 'ति स्वापाया तादृशीं सुप्तां सस्वापायां स्वस्या 'पायो विश्लेषस् तत्सहिताम् पुनः स्वापायां स्व-स्मात् अपगतः शुभावहविधिर् यस्याः तां दुरदृष्टाम् इत्य् अर्थः तां दमयन्तीम् इह वने निजवासःस्वापायात् निजं स्वकीयं यद् वासः स्वं च धनं तदपा-यात् तदपगमात् तद्वासः तस्या दमयन्त्या वासो वसनं निकृत्या "छित्वा 'मुञ्चद् अत्याक्षीत । यद्वा । विपदि किम्भूतायां स्वापायां स्वेन आत्मना आ-प्यते प्राप्यते स्वापा तस्यां सत्यां सस्वापायां स्वापयुतायां दमयन्त्यां सत्याम् इत्य् अर्थः । नलो वने प्रसुप्तां दमयन्तीं वसनार्धं छित्वा 'मुञ्चद् इति भावः । अमुचद् इति पाठे लुङि लृदित्वाद् अङ् ॥१२॥

बभ्रामे 'ति । रिपुमानस्तेनः शत्रुगर्वापहारी स नलः श्रमेन प्रयासेना 'नस्तेन ना 'स्तं गतेन सता अत्यन्तपरिश्रमेन दुःखात् तेन कलिना विधूयमानः कम्पितः सन् । अथवा कलिना अनस्तेना 'मुक्तेन श्रमेन यस्य श्रमस्य दुःखस्य कलिः प्रयोक्ता तेन परिश्रमेन दह्यमानः सन् बभ्राम पर्यटितवान् । हि यस्मात् कारणात् ते स्वभाग्यदोषाः स्वपूर्वार्जितदुःकृतादिकर्मदोषाः क्व कस्मिन् समहिमानः समहत्वाः न अपि तु सर्वत्रै 'व पूर्वकर्मप्रधानम् । यतो ऽयम् ईदृग् अव-नीशो ऽप्य् एकाकी गतराज्यभारो वने पर्यभ्रमीत् ॥१३॥

मृगे 'ति । स नलो दावि दावो वनवह्निस् तत्संयुक्ताम् प्रज्वलद्दावं विपिनं वनम् आर जगाम । यत्र यस्मिन् विपिने मृगकुलं मृगगणाम् आविश्रमम् आ समन्ततः अविश्रमं विश्रान्तिरहितम् आविर्भूतश्रमं वा यथा स्याद् एवम् आरसत् आर्ति-शब्दं कुर्वत् जलाभावात् तृषाकुलम् ममार । विः पक्षी अभितापातुरो ऽभि

शोकभरोदस्तेन श्रुतः स च नला 'द्रवे 'ति रोदस् तेन ।
द्रुतिम् अकरोद् अस्तेन स्वयम् इत्य् ऊचे भयम् पुरो ऽदस् ते न ॥१५॥
क्व भवान् शंसत्व् अस्यत्व् आपदम् इत्य् आश्रयो ऽनृशंसत्वस्य ।
तं देशं सत्त्वस्य प्राप नलः सत्वरो भृशं स त्व् अस्य ॥१६॥

समन्ततो यस् तापः सन्तापस् तेन आतुरः क्लान्तः सदा सर्वदा ममार मृत-वान् । सदा 'वो 'ति निर्विसर्गपाठे विपिनं किम्भूतम् अवि न विद्यन्ते वयः पक्षिणो यत्र तादृशम् अभितापातुर इति नलविशेषणम् इत्य् अर्थः । विस्तृता विस्तीर्णशाखाः रसदाः रसो भयानकरसस् तं ददाती 'ति तादृशाः निर्यासदाः वा । स्फुरिततमाः प्रकाशिततमा नगा वृक्षाः । स्फुटिततमा इति पाठे विदीर्णाः विस्तृताः भूमौ आस्तीर्णाः रसदाः निर्यासदाः दवाग्निना दह्यमानत्वात् सशब्दा वा नलो दवानलाकुलं वनं गतवान् । यत्र भयप्रद-विस्तीर्णशाखाः वृक्षाः यस्मिन् अतिगहनतरुदर्शनेन भयम् भवती 'ति या-वत् । यत्र चला अलसा मृगा इतस् ततो धावन्तः कृताक्रन्दाः सन्तो मृताः पक्षिणश् च मृताः । तादृशं विपिनम् मरुदेशं गतवान् इति भावः ॥१४॥

शोके 'ति । तेन नलेन शोकभरोदस्तेन शोकातिशयेन उदस्तेन व्याकुलेन उत् ऊर्ध्वम् अस्तेन क्षिप्तेन शरीराद् उद्भ्रान्तजीवेन । हे नल आद्रवा 'गच्छे 'ति रोदः रोदनं श्रुतः आकर्णितः तेन कारणेन स च नलः द्रुतिं वेगम् अकरोत् च पुनः हे अस्तेन अस्तः इनो प्रभुर् यस्य अनाथ हे । अदः इदं ते तव भयं न इति पुरो ऽग्रे स्वयम् ऊचे उक्तवान् । स्वकम् इति पाठे स्वकं स्व-कीयम् आत्मसम्बन्धि भयं तव ना 'स्ती 'त्य् अर्थः । शोकभरविक्षिप्तचेतसा नलेन नला 'गच्छे 'ति कर्कोटकनागरोदनं श्रुतं स वेगेन तत्र गत्वा ते इदम् भयं न भविष्यती 'त्य् अवोचद् इति भावः । अस्तेन इति सविसर्गपाठे अस्तेनः अस्तः कान्त्या तिरस्कृत इनः सूर्यो येने 'ति नलविशेषणम् । द्रु गताव् इत्य् अस्य लोटि मध्यमे । ऊचे ब्रुवो लिटि । स्यात् पुरः पुरतो ऽग्रतः । भीतिर् भीः साध्वसम् भयम् इत्य् अमरः ॥१५॥

क्वे 'ति । स तु नलो भृशम् अत्यर्थं सत्वरः त्वरायुक्तः सन् अस्य सत्त्वस्य प्राणि-नस् तं देशम् प्राप गतवान् भवान् क्वा 'स्ती 'ति शंसतु आपदम् अस्यतु त्यजतु इति निगद्ये 'ति यावत् । कीदृशो नलः । अनृशंसत्वस्य अक्रौर्यस्य

अथ पवनाशम् अयन्तं क्वा 'पि दवाग्नौ ददर्श नाशम् अयन्तम् ।
स्वबलेना 'शमयन्तं रुजम् अजिघृक्षच् च पुनर् अनाशम् अयं तम् ॥१७॥
स च धृतनागस् तेन स्वविषेण विद्रूपितो मनाग् अस्तेन ।
सहितो ऽनागस्तेन प्रोक्तश् चा 'त्मा 'स्तु वेदनागस् ते न ॥१८॥

कारुणिकत्वस्या "श्रयो निवासः । रोदनश्रवणानन्तरं नलो गत्वा भवान् क्वा 'स्ति कथयतु आपदं विपत्तिं जहातु इति निगद्य दवाग्निम् अविशद् इति भावः । शंसतु शंसु स्तुताव् इत्य् अस्या 'नेकार्थत्वाद् वदनमात्रार्थः । अस्यतु इति असु क्षेपणे इत्य् अस्य लोटि । विपत्त्यां विपदापदौ । नृशंसो घातुकः क्रूरः । प्रापे 'त्य् आपेर् लिटि । सत्त्वम् असौ तु जन्तुषु इत्य् अमरः ॥१६॥

अथे 'ति । अथ समीपगमनानन्तरम् अयं नलः तम् पवनाशम् पवनं वातम् अश्नाती 'ति पवनाशस् तादृशं तं सर्पं कर्कोटकं क्वा 'पि दवाग्नौ कस्मिन्न् अपि दवदहने अयन्तं गच्छन्तम् इतस् ततः नाशम् मृतिम् अयन्तं गच्छन्तं विनश्यन्तं ददर्शा 'द्राक्षीत् । कीदृशं स्वबलेन स्वप्रभावेन रुजम् पीडाम् अशमयन्तम् अपरिहरन्तम् । पुनः अनाशम् आशा जीविताशा तद्रहितम् । अनाशं न मृतम् मुमूर्षुं वा । अजिघृक्षच् च पुनः ग्रहीतुम् ऐच्छत् । नलो दवदहनदह्यमानं कर्कोटकम् अपश्यद् ग्रहीतुं चे "पीत् । जिह्मगः पवनाशनः । ग्रह उपादाने ऽस्य सनिग्रहगुहोश्चेतीट् निषेधाद् द्वित्वे कृते लङिरूपम् ॥१७॥

स चे 'ति । स च नलः धृतनागो धृतसर्पः मनाग् अस्तेन मनाक् ईषत् अस्तेन क्षिप्तेन तेन कर्कोटकेन स्वविषेण विद्रूपितः विद्रूपो ऽसुन्दरः कुब्जः कृतः अनागस्तेन आगस् तनोती 'त्य् आगस्तो न आगस्तो अनागस्तस् तादृशेन निरपराधिना । नलः किम्भूतः सहितः हितम् प्राणरक्षणलक्षणं तेन सहितः कृतात्मरक्ष उक्तस् च किम् इत्य् आह । हे नल ते आत्मा वेदनागः पीडाभाक् न अस्तु न भवतु । तव मत्प्रसादाद् विषवेदना मा 'भूत् । यद्वा यतः स नागः हितः तेन हेतुना उक्त इत्य् अर्थः । नलः सर्पम् उत्क्षिपंस् तेन दष्टो विद्रूपो ऽभवत् तेनै 'व च तव विषपीडा न भविष्यती 'त्य् अभिहितश् चे 'ति भावः । अत्र कथोपकथनम् भारते ऽनुसन्धेयम् । यथा कर्कोटकनामा नागो ऽहं नारदशापाच् चलितुम् अशक्तः पश्चात् स मुनिर् एवम् मा "ह यदा नलो राजा त्वाम् इतो नेष्यति तावत् त्वम् अचलो भूत्वा 'त्र तिष्ठ । अतस्

स्यात् तरसा कल्यं ते वपुर् अमुना ऽऽत्तेन वाससा कल्यन्ते ।
ये यशसा कल्यन्ते गुणोदयैर् दधति भूतिसाकल्यं ते ॥१९॥
अपि च विना मानेन अयणीयः स ऋतुपर्णनामा ने ऽनः ।

त्वम् माम् इतो नयस्व अहं तवो ऽपकारोपायम् अपि उपदेक्ष्यामि इत्य् उक्त्वा स मुष्टिप्रमाणो ऽभूत् नलस् तं वनाग्नेर् अन्यत्र निनाय ततस् त्यक्तुकामं नलम् पुनर् उवाच पदानि गणयन् गच्छ ततः श्रेयः करिष्यामि ततो नलेन एकादिक्रमेण गणयित्वा दशे ऽत्य् उक्ते आशाङ्कलेन नागस् तम् अदंशयत् ततो नलो विरूपो बभूव नागस् त्व् आह । जनास् त्वां न जानन्त्व् इति रूपम् अन्तर्धापितम् । यत्कृते त्वं दुःखी जातः स कलिर् मम विषेणा ऽन्तर्दग्धस् त्वां त्यक्ष्यति अयोध्यां गच्छ बाहुकनामा सारथिर् अहम् इति ब्रुवन् ऋतुपर्णनृपसमीपे स्थीयतां स ते ऽक्षविज्ञायविद्यां दत्वा ऽश्वविद्यां नेष्यति ततस् तव कल्याणम् भविष्यति मत्स्मरणार्थं वासोयुगं गृहाण यदा इदं वासः परिधास्यसि तदा निजरूपम् प्राप्स्यसि इत्य् उक्त्वा नागो गत इति महाभारत-वार्ता । नुन्नन्नुत्तास्तनिरस्यूता विद्धक्षिप्तेरिताः समाः । किञ्चिद् ईषन् मनाग् अल्पे । यातना तीव्रवेदना । पीडा बाधा व्यथा दुःखम् । अनागस्तेने ऽति तनोतेर् अन्येभ्यो ऽपि दृश्यत इति डप्रत्यये रूपम् । अस्तु अस्तेर् लोटि ॥१८॥

स्याद् इति । कर्कोटको नलम् आह । हे नल अमुना आत्तेन गृहीतेन वाससा वस्त्रयुगलेन ते तव वपुः शरीरं कल्यन्ते कलिपीडापगमे तरसा वेगेन कल्यं निरामयं स्याद् भविष्यति । ये जनाः यशसा कीर्त्या कल्यन्ते श्रीयन्ते ते गुणो-दयैः गुणानाम् उदयैर् अधिगमैः भूतिः सम्पत्तिः तत्साकल्यम् पूर्णत्वं दधति धारयन्ति । ये यशस्विनस् ते गुणोदयवशाल् लक्ष्म्या श्रीयन्त एवे ऽति अतः खेदम् मा कुर्व् इति भावः । आत्तेने ऽत्य् अत्र अन्तेने ऽति पाठे अध्यवसितेन ईप्सितेने ऽति यावत् याशसा इत्य् अस्य विशेषणं यद्वा निश्चयेन कल्यं स्याद् इत्य् अर्थः । यद्वा हे अन्तेने ऽति सम्बोधनम् अन्ते अन्तकाले इन प्रभो हे इत्य् अर्थः । वार्तो निरामयः कल्यः । अन्तो ऽध्यवसिते मृत्यौ स्वरूपे निश्चये ऽन्तिके । कलमदे ऽस्या ऽनेकार्थत्वाच् छ्रयणम् अर्थः । तस्मात् कर्मणि लटि रूपम् । समग्रं सकलम् पूर्णम् ॥१९॥

अपी ऽति । स एवा ऽऽह । हे अनेनः निष्पाप नल हे इन प्रभो मानेना ऽभिमानेन

स्वाङ्गेना ऽमा ऽनेन स्युर् विपदो न हि नृणां क्व नामा ऽनेनः ॥२०॥
व्रज सुखम् आयाही ऽनश्रीर् इत्य् अन्तर्हितः शमाया ऽहीनः ।
स्निग्धो मायाहीनः स्याज् जनतायाः क्व नो ऽत्तमाया ही ऽनः ॥२१॥
प्रीतिवशाद् अनवनतः कृत्वा तद्वसनम् आत्मसाद् अनवनतः ।
बहुमांसादनवनतः सो ऽस्माद् ऋतुपर्णम् आससाद न वनतः ॥२२॥

विना ऽपि च ऋतुपर्णनामा ऋतुपर्णाख्यो ऽनेन स्वाङ्गेन स्वशरीरेण अमा सह अयणीयो न अपि तु अयणीय एव । तत्र मानं न कार्यम् इति भावः । यद्वा ऋतुपर्णनामा इनः प्रभुः न अयणीय इति ने ऽत्य् अर्थः । हि यतः देहिनाम् प्राणिनां क्व नाम कुत्र नाम विपदो न विपन्नयो न अपि तु प्राणिनो विपदा परिभूयन्त एव अनेने ऽति निर्विसर्गपाठे न विद्यते इनः यस्य यस्माद् वा स अनेनः चक्रवर्तित्वात् तस्य सम्बोधने हे अनेन तथा च सार्वभौमत्वमानं न कार्यम् इति भावः । त्वया ऽनेन कुब्जशरीरेण समयप्रतीक्षया ऋतुपर्ण आ-अयणीयः प्राणिनां विपद् भवत्य् एवे ऽति समाश्वासयद् इति भावः । कलुषं वृजिनैनोऽघम् अंहोदुरितदुष्कृतम् । नाम प्रकाश्यसम्भाव्यक्रोधोपक्रमकुत्सने गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्व् अपि ॥२०॥

व्रजे ऽति । हे नल कथम्भूतः इनश्रीः इनस्य सूर्यस्य श्रीर् इव श्रीर् यस्य सूर्यकान्तिः अथवा इनश्रीर् इति सर्पविशेषणं युक्तं चे ऽतद् नलस्य विषेण तदानीं विरूपत्वात् व्रज गच्छ उद्दिष्टम् ऋतुपर्णसमीपम् इति यावत् । किमर्थं शमाय शान्त्यै सुखम् आयाहि आगच्छे ऽत्य् उक्त्वा ऽहीनः सर्पराजो ऽन्तर्हितः । एनम् एवार्थम् उपोद्घातयति । हि यतः उत्तमाया जनताया उत्कृष्टस्य जनसमूहस्य मायाहीनो निर्दम्भः इनः समर्थः स्निग्धो मित्रं क्व कुत्र न स्यात् अपि तु सर्वत्रै ऽव स्यात् । कर्कोटको नलं व्रज सुखं च लभस्वे ऽत्य् उक्त्वा ऽन्तर्दधे सज्जनस्य सुहृन् मिलत्य् एवे ऽति भावः । स्निग्धो वयस्यः सवयाः । इनः पत्यौ नृपार्कयोर् इति मेदिनी । स्याद् अस्तेर् विधिलिङि । जनते ऽति । ग्रामजनबन्धुसहायेभ्यस् तल् ॥२१॥

प्रीती ऽति । अर्थात् स नलः प्रीतिवशात् अनवनतः न नवनं स्तुतिः अनवनं तस्मात् पञ्चम्यास् तसिल् तथा च प्रीतिवशाद् एव तद्वस्त्रं गृहीतं न तु स्तवं

अकृत मुदा यन्तारं तं सो ऽमनुत ाध्वनो यदा ऽयं तारम् ।
ध्वनिसमुदायं तारं दधतो ऽस्य ह्याय् च तं तदा ऽयन्ता ऽरम् ॥२३॥
अथ सहसा दमयन्त्या सा दमयन्त्या ऽत्मशर्म निद्रा मुमुचे ।
जीवितसादम् अयन्त्या सादमयं त्यागम् अकृत स यदा तस्याः ॥२४॥

कृत्वे 'त्य् अर्थः । तद्वसनं वस्त्रम् आत्मसात् कृत्वा गृहीत्वा अस्माद् वनतः अरण्यात् ऋतुपर्णो ना ऽऽससाद अपि तु आससादे 'व काक्वार्थे नञ् । किम्भूतात् । न अवनं रक्षणं यस्मिंस् तस्माद् रक्षाहीनाद् बहुमांसादनवनतः बहुतरा ये मांसादना व्यालाः सिंहशार्दूलराक्षसास् तेषां वनतः वन्यते सम्भज्यते ऽस्मिन्न् इति वनं तादृशाद् बहुक्रव्यादसम्भजात् समूहात् । वस्त्रम् आच्छादनं वासश् चेलं वसनम् अंशुकम् । तद् अधीनवचन इति सातिः । वनषणसम्भक्ताव् इत्य् अस्य वनत इति । आससादे 'ति सदेर् लिटि ॥२२॥

अकृते 'ति । स ऋतुपर्णः तं नलम् मुदा हर्षेण यन्तारं सारथिम् अकृत । सो ऽयं नलो यदा 'ध्वनो मार्गस्य तारं तारणम् अमनुत मेने अङ्गीकृतवान् । तदा तस्मिन् काले तारम् अत्युच्चं ध्वनिसमुदायं ह्रेषासमूहं दधतः कुर्वन्तो ऽस्य ऋतुपर्णस्य हया अश्वा अरम् अतिशीघ्रम् आयन्त आजग्मुः । यदा ऋतुपर्णाल् लब्धसारथ्यो नलो मार्गे त्वां यथेष्टं तारयामी 'त्य् अङ्गीकृतवांस् तदा ह्रेषमाणा ऋतुपर्णवाजिनो ऽतिशीघ्रं चेलुर् इत्य् अर्थः । नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः । तारो ऽत्युच्चैस् त्रयस् त्रिषु इत्य् अमरः । अय गताव् इत्य् अस्या ऽऽत्मनेपदिन आयन्त ॥२३॥

अथे 'ति । अथ नलापगमानन्तरम् आत्मशर्म स्वसुखं दमयन्त्या उपतापयन्त्या दमयन्त्या भैम्या सा निद्रा शयनं सहसा शीघ्रम् मुमुचे त्यक्ता । कीदृश्या । जीवितसादं जीवितस्य सादम् अवसादं विनाशम् अयन्त्या गच्छन्त्या प्राणान् जहत्ये 'ति यावत् स च नलः सादमयं दुःखमयं त्यागम् परित्यागं तस्याः दमयन्त्याः यदा यस्मिन् काले अकृत कृतवान् नले ऽपयाते वनप्रदेशसुप्तया दमयन्त्या निद्रा मुक्ता कदा अयं नलः दुःखप्रचुरं तत्त्यागं यदा 'कार्षीत् । दमु अपतापे ऽस्य ण्यन्तस्य शत्रन्तस्य स्त्रीत्वे दमयन्त्ये 'ति रूपम् । साद्यते ऽवसाद्यते ऽनेने 'ति सादो दुःखम् । त्यज हानाव् इत्य् एतद् धात्वर्थत्वेन कपठोक्त एवार्थः । अकृते 'ति कृञो लुङि । जीवितसादम् इत्य् अत्र धोहिं-

सा ऽत्र ससादा रामा सीते ऽव त्रासम् आससाद रामा ।
या प्रासादारामान् उपेत्य भर्त्रा रतिं रसाद् आरा ऽमा ॥२५॥
तत्र पदे व्यालीनाम् अथ विभ्रान्तं वने च देव्या ऽलीनाम् ।
तरुवृन्दे व्यालीनां ततिं दधाने तया ऽऽस्पदे व्यालीनाम् ॥२६॥
वेगबलापासितया वेण्या भैमी युता ललापा ऽसितया ।
नृप सकलापासितया कृत्वा ऽरीन् बान्धवान् किला ऽपासि तया ॥२७॥

सादम् इति पाठे धीहिंसा बुद्धिनाशस् तं ददाती ऽति सः तं नलम् अयन्त्या चिन्तयन्त्या नलः क्व गतः अहं वा क्व गच्छामि कुत्र तम् पश्यामी ऽति भावयन्त्या । अयधातोर् गत्यर्थकत्वात् ज्ञानार्थकत्वम् इत्य् अर्थः ॥२४॥

से ऽति । अत्र भयङ्करे वने सा रामा दमयन्ती ससादा सदुःखा त्रासम् भयम् आससाद प्राप्तवती । का इव । अरामा रामरहिता सीते ऽव । या दमयन्ती पूर्वम् प्रासादारामान् प्रासादान् नृपगृहान् आरामान् उपवनानि उपेत्य आगत्य रसात् स्नेहात् भर्त्रा नलेन अम सह रतिं क्रीडाम् आर प्राप । प्रासादो देवभूभुजाम् । आरामः स्याद् उपवनम् । सुन्दरी रमणी रामा । अमा सह समीपे चे ऽत्य् अमरः ॥२५॥

तत्रे ऽति । अथा ऽनन्तरं तत्र तस्मिन्न् अरण्ये तया देव्या दमयन्त्या च पुनः बहु विभ्रान्तम् बहुविधं विभ्रमितम् पर्यटितम् । नलम् अन्वेषयन्ती ऽति शेषः । कीदृशे वने । व्यालीनां सर्पिणीनाम् पदे स्थाने । पुनस् तरुवृन्दे व्यालीनां कृत्नाम् आसक्ताम् अलीनाम् भृङ्गाणां ततिं समूहं दधाने धारयति । पुनः व्यालीनां वयः पक्षिणस् तेषाम् आलीनाम् पङ्क्तीनाम् आस्पदे प्रतिष्ठास्थले । आली सख्या वली अपि । षट्पदभ्रमरालयः । देवी कृताभिषेकायाम् । विभ्रान्तम् इत्य् उदितोवेतीड्ढ विकल्पः । प्रतिष्ठास्थानम् आस्पदम् ॥२६॥

वेगे ऽति । वेगबलेन धावनबलेन अपासितया विस्तृतया अपगता आसिता उपवेशनत्वम् । अथवा असिता विद्यमानता यस्याः सा तया त्रुटितया असितया श्यामलया वेण्या युता सहिता भैमी दमयन्ती ललाप विललाप । किं विललापे ऽत्य् आह । हे नृप हे राजन् तया सकलापासितया कलापस् तूणीरः असिः खड्गः ताभ्यां सहितः सकलापासिः तस्य भावस् तत्ता तया करणेन ।

स कथम् मानवनानान्यायविद् आचरसि सेव्यमानवनानाम् ।
धृतसीमानवनानां दाराणां त्यागम् अनुपमा 'नवनानाम् ॥२८॥
परकृतम् एतत् तु एनः स्मरामि यत् न स्मृतो ऽसि मे तत्त्वेन ।
दोषसमेतत्वेन प्रदूषये ना 'त्र सम्भ्रमे तत् त्वे 'न ॥२९॥

यद्वा । वेगबलापासितया वेगं च बलं च आप्नोती 'ति वेगबलापः स चा 'सिश् च वेगबलापासिर् यस्य स तस्य भावस् तत्ता तया दृढखड्गवत्त्वेन कथम्भूतया सकलापासितया सकलानाम् अर्थात् शत्रूणाम् अपासितया अपहृतखड्गतया अरीन् हत्वा बान्धवान् बन्धून् आपासि रक्षसि किले 'ति वार्ता । त्वयि खड्गधारिणि सति अन्येषां हस्तात् खड्गाः स्वयम् पतन्ती 'ति भावः । स त्वम् एकाकिनीम् मां वने त्यक्त्वा कथम् गतो ऽसि पुनर् ना 'यासी 'ति भावः । वार्तासम्भाव्ययोः किल । कलापो भूषणे बर्हे तूणीरे संहते ऽपि च । आपासी 'ति । पा रक्षणे इत्य् अस्य लटि ॥२७॥

से 'ति । प्रेमकरुणादिकम् अनुस्मरन्ती आह । हे मानवनानान्यायवित् मनुः प्रजापतिस् तत्प्रणीतो यो नाना बहुप्रकारो न्यायो धर्मशास्त्रं तद् वेत्ती 'ति तादृक । यद्वा । मानवा मनुष्यास् तेषां नानान्यायो व्यवहारस् तं वेत्ती 'ति ज्ञातसकलधर्मशास्त्रमानुषव्यवहाराभिज्ञ । हे अनुपम निरुपम । स त्वम् अनवनानाम् अवनं रक्षणं तद्रहितानां सेव्यमानवनानां सेव्यमानम् आश्रीयमाणं वनम् अरण्यं यैस् तादृशानां वनमध्यगतानां धृतसीमानवनानां धृतं सीमायाः कुलमर्यादायाः नवनं स्तवो यैस् तादृशानां दाराणां स्त्रियाः त्यागम् परित्यागं कथम् आचरसि कापि अदुष्टभार्यात्यागे दोषं कथं न विचारयसी 'ति भावः । स कथम् मानवनानाम् इति सानुस्वारपाठे हे न्यायवित् एतस्मिन् कर्मणि धर्मो ऽधर्मो वे 'ति विचारपण्डित हे किम्भूतानां दाराणाम् मानवनानाम् मानानां वनं गहनं येषां तेषाम् मानगहनानाम् इत्य् अर्थः । पुम्भूम्नि दाराः ॥२८॥

परे 'ति । हे इन स्वामिन् नल यत् यस्मात् एतत् मत्परित्यागरूपम् एनः पापम् परकृतम् परेण कलिना कृतं स्मरामि जानामि । तु पुनः त्वम् मे मया तत् तस्मात् तत्त्वेन सत्स्वरूपत्वेन याथार्थ्येन न स्मृतो ऽसि न ज्ञातो ऽसि । अपि तु तत्त्वतो ज्ञातो ऽसि । त्वं स्वबुद्ध्या एवं ना 'चरसि । अत्र सम्भ्रमे दुःखे दो-

हृद्यौका यस् ते न स्थीयेत यथे 'व पावकायस् तेन ।
यावत् कायस् ते न त्यज्येत स्व हृदि चा 'धिकायस्तेन ॥३०॥
यं स्वपदेशं कमित स्वजनो ऽयम् प्राप्य जनपदेशं कम् इतः ।
अरिवृन्दे ऽशङ्क मितस्मित स त्वम् उपागतो ऽसि देशं कम् इतः ॥३१॥

पसमेतत्वेन सदूषणात्वेन त्वा त्वां न दूषये न दूषयामि कलिकृते अपराधे त्वां कथं दूषयामि त्वं सर्वदा दूषणरहित इति भावः । नञ् काक्वर्थे । समौ संवेगसम्भ्रमौ । दूषय इति दोषोणाव् इत्य् ऊत्वे रूपम् ॥२१॥

हृदे 'ति । दमयन्त्य् आत्मानम् प्रत्याह । हे स्व आत्मन् यावत् यत् कालपर्यन्तं ते त्वया कायः न त्यज्येत न मुच्येत तावत् यस् ते तव हृद्यौका हृदयम् ओक आश्रयो यस्य स हृदयवासी नलः तेन नलेन हृदि हृदये अधिकायस्तेन अधिकम् आयस्तेन व्याकुलेन न स्थीयेत अपि तु स्थातव्यम् एव । किम् इव । यथे 'व पावकायः पावके ऽग्नौ अयो लोहम् इव दहनगतलोहम् इव । हे आत्मन् यावत् त्वम् इमं कायं न जहासि तावत् विरहानलप्रदीप्ते मद्धृदि नलः स्थास्यति । यथा 'ग्नौ लोहम् एवं तस्य मत्प्रियस्य दुःखम् भवती 'ति त्वं शीघ्रं कायं जहीही 'ति भावः । स्वो ज्ञाताव् आत्मनि । स्थीयेते 'ति घुमास्थागापाजहातिसांहलो 'ति दीर्घः । पिण्डं कालायसायसी । आयस्ते 'ति आङ्पूर्वकयसु प्रयत्ने धातोः क्तः ॥३०॥

यस्ये 'ति । अयं स्वजनो बन्धुवर्गः यस्य पदे तव राज्ये यं त्वां जनपदेशं राष्ट्राधिपम् प्राप्या 'धिगम्य शं कल्याणं कं सुखम् इतः प्राप्तवान् । हे कमित कान्त अरिवृन्दे शत्रुसमूहे अशङ्क शङ्कारहित मितस्मित मितपरिहास स त्वम् इतो वनात् कं देशं कां भुवम् उपागतो ऽसि गतवान् असि । आदौ यं स्वपदेशम् इति पाठे स्वपदेशं शोभनो ऽपदिश्यत इत्य् अपदेशो नाम तादृशं शोभनाख्यं यं जनपदेशम् प्राप्य स्वजनः कं सुखम् अयं शुभावहविधिम् इतः प्राप्तः । यद्वा । स्वपदे स्वस्थाने स्थानान्तरं कथम्भूतम् अशम् अकल्याणम् इत्य् अर्थः । दमयन्ती विलपन्ती 'दम् आह हे नल यं त्वां राज्याधिपम् प्राप्या "त्मीयलोकः सुखम् प्राप्तवान् स मां दुःखजलधौ मज्जन्तीम् उपेक्ष्य अस्माद् वनात् कं देशं गतवान् । पदं व्यवसितत्राणस्थानलक्ष्मयङ्घ्रिवस्तुषु । शं सुखे । कम् कान्ताव् इत्य् अस्य क्तौ । बन्धुस्वस्वजनाः समाः । स्वो

यद्यशसा 'नुरु रोदःकुहरं यो द्वेष्टुर् अञ्जसा नुर् उरोदः ।
अद्रेः सानु रुरो ऽदः किम् आप दयितो ममे 'ति सा 'नुरुरोद ॥३२॥
अय कलनाम् आनन्ते 'त्य् अयं जनो ददति चा 'ङ्गना मानं ते ।
हार्दे नामा 'नन्ते जनम् एनम् अशोक कुरु सनामानं ते ॥३३॥
उच्चशिरोदाराव् आलप्ये 'ति वने सुबन्धुरो दारावा ।

ज्ञाताव् आत्मनि स्वं त्रिषु आत्मीये स्वो ऽस्त्रियां धने । स्वपद इति निमित्तसप्तमी ॥३१॥

यद् इति । हे रुरो हे चित्रमृग यद्यशसा यस्य कीर्त्या रोदःकुहरं द्यावाभूम्यन्तरम् एकोक्त्या रोदःशब्दः सान्तःस्वर्गभूमिवाची तयोः कुहरम् विवरम् अनुरु अविपुलम् अल्पं कृतम् अत्र न माती 'ति भावः यश् च द्वेष्टुः द्वेषं कुर्वतो नुः पुरुषस्य अञ्जसा झटिति उरोदः उरो वक्षो द्यति खण्डयती 'ति तादृश द्विपद्वक्षोविदारणशरवर्षी 'त्य् अर्थः । स मम दयितो वल्लभो नलो ऽदो ऽद्रेः सानु गिरेः समभूभागं किम् आप प्राप्तवान् । इत्य् उक्त्वा 'नुरुरोद पश्चाद् अरोदत् । वने दमयन्ती मृगाम् पृच्छति वने चरन् लोपाः यत्कीर्त्या द्यावाभूमी पूरिते यश् च द्विपद्वनदावानलः किं गिरिसानुम् प्राप्तवान् इत्य् उक्त्वा रुरोद । बहुरुविपुलम् । द्यावाभूमी च रोदसी । पुरुषाः पूरुषा नरः । स्नुः प्रस्थः सानुर् अस्त्रियौ । उरोद इति उरो द्यती 'ति दो अवखण्डने धातोर् आतो ऽनुपसर्गे क इति कः । कृष्णसाररुरुन्यङ्कुरङ्कुशम्बररौहिषाः । आपे 'त्य् आप्लेर् लिटि । पश्चात् सा दृश्ययोर् अनु । रुरोदे 'ति रुदिर् अश्रुविमोचन इत्य् अस्य लिटि ॥३२॥

अये 'ति । दमयन्त्य् अशोकम् उपगम्या 'ह । हे अशोकवृक्ष अयं जनो मल्लक्षण आनन्ता प्रणमती 'ति कलनाम् बुद्धिम् पूजां वा अय आश्रय गृहाण । अङ्गनाः स्त्रियश् च ते तव मानम् पूजां दोहदं वा ददति ददते । स्त्रीसंस्पर्शात् तव पुष्पोत्पत्तिर् इति भावः । नाम सम्भावनायाम् अतो अनन्ते बहुतरे हार्दे प्रेमणि सति । एनं जनं ते तव सनामानं स्वनामाख्यम् अशोकं शोकरहितं कुरु । हृदः कर्म हार्दम् । हायनान्तयुवादिभ्यो ऽणित्यण् । हे अशोक त्वां नौमि माम् अपि शोकरहितां कुर्व् इति भावः ॥३३॥

उच्चे 'ति । सुबन्धुरा अत्यन्तसुन्दरी उदारावा उदारा आवा गतिर् यस्यास् तादृशी

द्रुतिम् अकरोद् आरा 'वा रुदम् मरुतलम् अथो सरोदारावा ॥३४॥
मृगकुलम् आरव्य् आधिप्रचुरम् बिभ्रद् वनं समारव्याधिः ।
वीथ्या मारव्या 'धिष्ठितभुजगम् भीमजे 'यम् आर व्याधि ॥३५॥
सास्रवनासारा साविगमना भीमनन्दना सारासा ।

दमयन्ती । उच्चशिरोदारौ उच्चशिरसो दारवो देवदारुद्रुमा यस्मिंस् तादृशे वने इति पूर्वोक्ताम् आलप्या 'भष्य विलप्य वा द्रुतिं वेगम् अकरोत् गतिं वा । यद्वा । उच्चशिरा उच्चग्रीवा उदारावा उत् ऊर्ध्वम् आरावः शब्दो यस्याः सा उच्चस्वरा उच्चैः विलप्ये 'ति यावत् । यद्वा एवार्थे वाशब्दः उदारा दक्षिणा । उदारो दातृमहतोर् दक्षिणे ऽप्य् अभिधे धेयवत् इति मेदिनिकारः अस्ति चा 'दन्तो ऽपि शिरशब्दः पिण्डं दद्याद् गया शिरे इति दर्शनाद् इत्य् अर्थः । अथो वेगकरणानन्तरं सरोदारवा । रोदनशब्दसहिता रुदन्ती रुवं शुष्कम् अवाः जलहीनं न विद्यते वाः जलं यस्मिंस् तादृशम् मरुतलम् मरुदेशम् आर गतवती । क्वाचिद् अतिसुन्दरे वने विलप्य दमयन्ती निर्जलम् मरुदेशं गतवती रुदती 'ति भावः । दारुशब्दस्य वने वृक्षत्वप्रवृत्तिनिमित्तत्वाद् भाषितपुंस्कत्वेन तृतीयादिषु भाषितपुंस्कम् पुंवद्गालवस्ये 'ति पुंवद्भावात् घेरत्वादि । वृक्षत्वप्रवृत्तिनिमित्तत्वे चा 'स्य पुंस्त्वाश्रयणात् । भद्रदारु द्रुकिलिमम् पीतदारु च दारु चे 'त्य् अमरः । वा गतिगन्धनयोर् इत्य् अस्य आवे 'ति । वा समुच्चय एवार्थे इति हेमः । ऋ गताव् इत्य् अस्या "रे 'ति च ॥३४॥

मृगे 'ति । इयम् भीमजा दमयन्ती मारव्या मरोर् इयम् मारवी तया वीथ्या मार्गेण समारव्याधि मारस्य कामस्य व्याधिः मारव्याधिः तत्सहितम् आरवि सशब्दम् । यद्वा । आरवि आराः इतस् ततो जङ्गमा वयः पक्षिणो यत्र तत् । आधिप्रचुरम् मानसीव्यथाबहुलम् मृगकुलम् बिभ्रद् धारयद् वनम् आर गतवती । कीदृशं वनम् । व्याधि व्याधो लुब्धकस् तत्सहितम् अधिष्ठितभुजगम् अधिष्ठिताः भुजगाः सर्पा यस्मिंन् तत् । समारव्याधिर् इति सविसर्गपाठे दमयन्तीविशेषणम् । पुंस्याधिर् मानसी व्यथा । स्त्री रुग् रुजा चो 'पतापरोगव्याधिगदामयाः । आरे 'ति ऋ गताव् इत्य् अस्य लिटि । वीथ्य् आलिर् आवलिः पङ्क्तिः श्रेणी लेखास् तु राजयः । वीथी पदव्य् अपी 'त्य् अमरः ॥३५॥

सास्रे 'ति । सास्रवनासारा अस्रवनम् अश्रुजलं तस्या "सारो वेगवर्षणं तत्सहिता सा-

सुनयननासा ऽऽरा ऽसाव् अजगरम् अग्रासि चा ऽमुना सारा सा ॥३६॥
अथ शवरो हास्यन्तं स्वासूंस् तदसूंश् च रिपुतरोहा स्यन्तम् ।
समधिरुरोहा ऽस्यन्तं न्यस्य तदास्ये ऽकरोत् खरो हास्यं तम् ॥३७॥

वेगमना आवेग उद्वेगः तत्सहितम् मनो यस्याम् तादृशी सारासा आरासो रोदनरवस् तत्सहिता । यद्वा । असारासा असारः अस्थिरः आस उपवेशनं स्थितिर् वा यस्याः सा भावे घञ् । असौ भीमनन्दना दमयन्ती अजगरं सर्पम् आर प्राप्तवती । अमुना चा ऽजगरेण सारा श्रेष्ठा सा दमयन्ती अग्रासि ग्रस्ता । कीदृशी । सुनयननासा नयनं च नासा च नयननासं शोभनं नयननासं यस्याः सा तादृशी सुनेत्रनासिके ऽति यावत् । महतलम् अटन्ती दमयन्ती अजगरम् अद्राक्षीत् तेन चा ऽजगरेण सुमुखी कवलिता इति भावः । वनं सलिलकानने । आसारा वेगवर्षणम् । नन्दिग्रहिपचादिभ्यो ल्युणिन्य च इति ल्यौ नन्दने ऽति । द्वन्द्वश् च प्राणितूर्यसेनाङ्गानाम् इति नयननासम् इत्य् एकवद्भावः । आरे ऽति ऋ गताव् इत्य् अस्य लिटि । अजगरे शयु वाहस इत्य् उभौ । ग्रसु ग्लसु अदने लुङिचिणि वृद्धौ अग्रासी ऽति । अश्रु नेत्राम्बु रोदनं चा ऽस्रम् अस्रु च । सारो बले स्थिरांशे च न्याय्ये क्लीवे वरे त्रिषु ॥३६॥

अथे ऽति । अथा ऽजगरग्रसनानन्तरं रिपुतरोहा रिपूणां तरो बलं हन्ती ऽति रिपुतरोहा शत्रुबलघातकः शवरः किरातः स्वासून् स्वप्राणान् हास्यन्तं जिहासतम् । तदसूंश् च तस्या दमयन्त्या असून् प्राणान् स्यन्तं विनाशयन्तम् अजगरं समधिरुरोहा ऽऽरूढवान् । तं हास्यं हासयोग्यम् अकरोद् अकार्षीत् । किं कृत्वा तदास्ये तस्या ऽजगरस्या ऽऽस्ये मुखे अस्यन्तं खड्गाग्रं न्यस्य निक्षिप्य शवरः किम्भूतः खरस् तीक्ष्णस्वभावः । शवरो दमयन्तीप्राणान् विनाशयन्तम् मारयिष्यन्तं तम् अजगरं खड्गाग्रभिन्नमुखम् अमारयद् इत्य् अर्थः । रिपुतरोहे ऽति । ब्रह्मभ्रूणवृत्रेषु क्विब् इति सूत्रेण ब्रह्मादिषु एव हन्तेः प्रयोगाच् चिन्त्यम् इदम् । यद्वा शवरः कथम्भूतः रिपुतरः । हा इति कृत्वा । हा विषादे च शोके च कुत्सादुःखार्थयोर् अपी ऽति मेदिनी । हास्यन्तम् इति । ओहाक् त्यागे ऽतो लृटः शद्धेतिशता । पुंसि भूम्न्य् असवः प्राणाः । तरसी बलरंहसी । षोऽन्तकर्मणी ऽत्य् अस्य स्यन्तम् इति । समधिरुरोहे ऽति लिटि । हास्यम् इति । तद् अर्हती ऽति यः ॥३७॥

ताम् पुनर् एकाम् अयतः कृशां किरातः स्मरातिरेकामयतः ।
कान्तारे ऽकामयत स्त्रियं न काङ्क्षेद् उपह्वरे कामयतः ॥३८॥
धृतवनमस्यन्तेन त्राता ऽसि मया ननु त्वम् अस्यन्तेन ।
मानिनि मस्यं तेन प्रसीद शरणागताः क्व मस्यं ते न ॥३९॥
सुमुखनिशापे ते नः स्मर दासान् इति प्रोच्य वसापेतेन ।
दत्ते शापे तेन स्थितया ऽसान्त्वेन चलदृशा पेते न ॥४०॥

ताम् इति । तां दमयन्तीम् एकाम् एकाकिनीं सहायरहिताम् अयतः शुभदैवात् कृशां तनुं दैववशात् दुर्बलाम् इत्य् अर्थः । स्मरातिरेकामयतः स्मरस्य कन्दर्पस्या ऽतिरेक आधिक्यं स एवा ऽऽमयो व्याधिस् तस्मात् कन्दर्पाधिक्यव्याधेर् हेतोः किरातः कान्तारे महावने अकामयत अचीकमत स्त्रीत्वेने ऽति शेषः त्वम् मम भार्या भवे ऽति कामनाम् अकरोद् इति भावः । अत्र हेतुम् आह कामयतः कामेन यतः संयतः । कामातुरः उपह्वरे रहसि स्त्रियं ना ऽकाङ्क्षेन् ने ऽच्छेत् किम् । नञ् काक्वर्थः । अपि तु काङ्क्षेद् एव । उपह्वरं रहसि सन्निधौ इति हेमचन्द्रः ॥३८॥

धृते ऽति । शबरो भैमीम् आह । ननु भो मानिनि दमयन्ति धृतवनमस्यन्तेन धृतः श्रितो वनमस्यन्तो वनभूमिप्रान्तं येन तादृशेन अस्यन्तेन सर्पनाशकेन मया त्वं त्राता ऽसि रक्षिता ऽसि । तेन हेतुना मस्यम् प्रसीद प्रसन्ना भव । शरणाया ऽऽत्मत्राणाय आगताः प्राप्ता जनाः क्व कुत्र न मस्यं ते न पूज्यं ते । हे दमयन्ति अजगरं विनाश्य मया रक्षिता ऽसि । अथ शरणागताय मे प्रसीद । मस्यन्त इति । मह पूजायाम् इति अस्य कर्मणि लटि । शरणं गृहरक्षित्रोर् इत्य् अमरः । नन्व् आक्षेपे परिप्रश्ने प्रत्युक्ताव् अवधारणे । वाक्यारम्भे ऽप्य् अनुनयामन्त्रणानुज्ञयोर् अपी ऽति हेमः । अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः । अवयवे ऽपी ऽति हेमः ॥३९॥

सुमुखे ऽति । हे सुमुखनिशापे सु शोभनम् मुखं सुमुखं तद् इव निशापः चन्द्र इव यस्याः सा सुमुखनिशापा तस्याः सम्बोधने हे शोभनमुखचन्द्रे ते तव नो ऽस्मान् दासान् स्मर जानीहि इत्य् अनेन प्रकारेण प्रोच्य उक्त्वा ऽसान्त्वेन क्रोधेन स्थितया चलदृशा चञ्चलाक्ष्या शापे दत्ते वसापेतेन वसा मेदस् तया

दग्धसरागाहितया दमयन्त्या विपिनभूः परा गाहि तया ।
उच्चतरागाहितया दृष्ट्या घोरा च कन्दरागाहितया ॥४१॥
पदवा ऽपदवापद् अवापद् अवार् अयतो ऽद्रिवनं विललाप च सा ।
तरसा ऽन्तर सान्तरसान्तर सान्वयदुःख वृणीष्व सखे मरणम् ॥४२॥

ऽपेतेन हीनेन सता मदनज्वलनदह्यमानमेदसा तेन शवरेण किं न पेते अपि तु मूर्छितम् एव । नञ् काक्वर्थः । क्रुद्धया दमयन्त्या शापे दत्ते शवरो मूर्छितो ऽभूद् इति भावः । सुमुखि विशापे ते ने ऽति पाठे हे शोभनमुखि ते तव नः अस्मान् दासान् स्मरे ऽति विशापे शापाभावे शापपूर्वम् इत्य् अर्थः प्रोच्य तेन न पतितम् इति काकुः । स्नुन् मेदस् तु वपा वसा । साम सान्त्वम् उभे समे । पेते इति पततेः कर्मणि लिटि ॥४०॥

दग्धे ऽति । दग्धसरागाहितया दग्धः सरागः सकामो ऽहितः शत्रुः शवरो यया सा तादृश्या तया दमयन्त्या परा ऽन्या विपिनभूर् वनभूमिर् अगाहि अवगाहिता । उच्चतरागाहितया उच्चतरा ये अगा वृक्षास् तेषु आहितया आरोपितया दृष्ट्या च घोरा भयावहा कन्दरा दरी अगाहि । कन्दरागाहितये ऽत्य् एकम् पदं वा । कन्दरायुक्ताद्रौ आहितया क्षिप्तये ऽत्य् अर्थः । अत्र पक्षे घोरे ऽति भूविशेषणम् । यद्वा परागाहितया पुष्पधूलिव्याप्तया दृष्ट्या वनभूः अगाहि विलोडिते ऽत्य् अर्थः । दग्धशवरया तया भैम्या अन्या ऽटवी अवगाहिता घोरा कन्दरा चा ऽदर्शि इति भावः । गाह अवगाहने ऽस्माल् लुङि चिणि ॥४१॥

पदवे ऽति । अयतः शुभदैवात् पदवा पदाभ्यां वाती ऽति पदवा सा दमयन्ती अपदवापत् । अपगता दवापत् दवाग्निजन्यदुःखं यस्मात् तं तादृशम् अद्रिवनम् पर्वतवनम् अवापत् लेभे । रयतो वेगाद् अवापद् इति वा । कीदृशम् । अवाः न विद्यते वार् जलं यस्मिंस् तत् जलरहितं विललाप च पर्यदेवीच् च । हे सान्तरसान्तर । सान्तम् अन्तसहितं रसान्तरं करुणातिरिक्तं रसो यस्मात् तादृश । हे सान्वयदुःख अन्वयः सन्तानम् तत्सहितं दुःखं यस्मिंस् तादृश । सान्तरदुःख इति पाठे अन्तःकरणदुःखसहित हे । हे अन्तर आत्मन् सखे मित्र तरसा वेगेन मरणं वृणीष्व वरय । पदचारिणी दमयन्ती दवविपद्रहितं जलशून्यं गिरिवनं गता विलापं चा ऽकार्षीत् । हे आत्मन् सपरिवारदुःखाकुल मरणम् इदानीं वरय । साम्प्रतं कियत् सहे मम मरणम् एव वरम्

वृक कोपपुरःसरम् आसर मा सर मा सरमा भवता ननु सा ।
किम् ऋते दयिताद् अयतोदयतोदयतो ऽदयतो ऽस्ति ममे 'ह सुखम् ॥४३॥
अयि राक्षस भक्षय मां क्षुधितो न वसा 'नवसान वसान वसाः ।
रुजम् उज्झ जने ऽत्र च देहे करुणान्तरदान्तरदान्तरदा 'न्तर् अदाम् ॥४४॥

इति भावः । अवापद् इति आपेर् लुङि ऌदित्वादङ् । रपलपजल्पव्यक्तायां वाची 'त्य् अस्य लिटि ललापे 'ति । अन्तरम् अवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्ये ऽन्तर आत्मनि चे 'त्य् अमरः ॥४२॥

वृके 'ति । वने गच्छन्ती कन्दरातो निःसृतं व्यात्तमुखं वृकं दृष्ट्वा 'ह । हे वृक तरक्षो कोपपुरःसरं क्रोधपूर्वकम् मा माम् आसर आगच्छ माम् भक्षये 'त्य् अर्थः । मा सर इतो मा गच्छ । ननु भोः सा तव स्त्री वृकी भवता त्वया सरमा सलक्ष्मीका भवतु तथा च माम् भक्ष्य स्वस्त्रिया सह स्थीयताम् इति भावः । यद्वा । सा सरमा श्वापदत्वात् शुनी तव स्त्री त्वया सरमा भवत्व् इति शेषः अतो मा सर अन्यत्र मा गम्यताम् माम् एव भक्षये 'त्य् अर्थः । अयतोदयतोदयत. अयं शुभदैवं तस्य तोदः क्षेपस् तत्र यतो रत उदयो ऽभ्युदयो वा यस्य तादृशात् । अदयतः निष्करुणाद् दयितात् स्वीयान् नलाद् ऋते विना इह 'वसरे मम किं सुखम् अस्ति स्वास्थ्यम् अस्ति । यत् तु हे अयतोदयते 'ति भिन्नम् पदम् अयो दैवं तेन या पीडा तया यतः बद्धः दैवपीडित उदयत उद्गच्छतः । अपरं तथे 'वे 'ति ध्येयम् । यद्वा हे वृक कोपपुरःसरम् मा सर स्वगृहात् मा गच्छ आसर परावृत्य आगच्छ सा तव स्त्री सरमा सलक्ष्मीका भवत्व् इत्य् अर्थः । तथा च क्रुद्धः सन् गृहात् मा गच्छे 'ति भावः । दमयन्ती वृकम् आह हे वृक त्वम् माम् आसर नलाद् ऋते मम किं सुखं जीवितेन वा किम् प्रयोजनम् अतो मांम् भक्षयित्वा स्वस्त्रिया सहै 'व स्थीयताम् मा विरही भवे 'ति तात्पर्यार्थः । तरक्षुस् तु मृगादनः । वृको ऽपि । आसरे 'ति सर्तेर् लोटि । माशब्दो ऽयं न माङ् । सरमा शुनी । प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु । पृथग् विना 'न्तरेण र्ते हिरुक् नाना च वर्जने ॥४३॥

अयी 'ति । भैमी राक्षसं दृष्ट्वा 'ह । अयि अहो राक्षस वसाः मेदांसि वसाना 'च्छादय अनवसान मरणहीन क्षुधितो बुभुक्षितस् त्वं न वस न तिष्ठ माम् भक्षय ।

क रमाकर माकरम् आकरम् आकलय व्यसनम् मम पाहि हरे ।
दरतो ऽदरतोदरतोदरतो विहृतैर् मरुतां सुकर त्वम् अपि ॥४५॥

अत्र च जने महाक्षणे करुणान्तरदान्तरदान्तरद । करुणान्तरं करुणावकाशस् तेन दान्तम् उपशान्तं रदान्तरं दन्तान्तरं ददाती 'ति तादृक करुणाहीनरदनान्तरप्रदायक रुजम् पीडाम् उज्झ त्यज मयि पीडां त्यज । अहम् अन्तः हृदयम् अदां दत्तवती । यद्वा । करुणां तर सन्तर मद्विषये दयां त्यजे 'त्य् अर्थः हे दान्तरदान्तरद दान्तः समर्थः रदो दन्तः तस्या 'न्तरेण द्यति खण्डयति स हे राक्षस मयि स्त्री अवध्ये 'ति रुजं त्यक्त्वा माम् भक्षय तुभ्यम् अहं शरीरं दत्तवती 'त्य् अवोचद् इति भावः । अदाम् इति ददातेर् लुङि । यद् अपि वहेः करुणां तरदान्तरदान्तरदान्तरद इति पाठः । आन्तरं चित्तं द्यति खण्डयति तां रुजं त्यज । त्वम् अत्र जने करुणां वहेः । हे रदान्तरद दन्तान्तरप्रद । दान्तं संसारं तर इति तदर्थः ॥४४॥

क रमे 'ति । हे रमाकर लक्ष्मीप्रद । क ब्रह्मन् मम व्यसनं विपदम् माकरम् आकरम् मकराणाम् अयम् माकरस् तादृशम् आकरं खनिम् आकलय मम शोकं समुद्रं जानीहि । मरुतां देवानां सुकर अकृच्छ्रकर हे हरे कृष्णनामोच्चारणेन हरति पातकानि इति हरिः तस्य सम्बोधनं त्वम् अपि अदरतोदरतोदरतः अदरो ऽनल्पो यस् तोदो दुःखं तत्र रतम् उदरम् अभ्यन्तरं यस्य तादृशात् दरतो भयात् विहृतैर् आश्वासनवचनैः पाहि रक्ष । यद्वा कं सुखं रमा लक्ष्मीस् तयोर् आकरः उत्पत्तिभूमिः स चा 'सौ माकरः शोभाकरम् च तत्सम्बोधनम् माकरम् मकरसम्बन्धिसमुद्रसदृशम् मा लक्ष्मीः तस्याः आकरः उत्पत्तिस्थानं समुद्रम् इवे 'ति वा 'र्थः । हे ब्रह्मन् मम शोकः समुद्र इव प्रवृद्धः । देवभयापहारिन् हे कृष्ण त्वम् अपी 'दृशे कष्टे माम् आश्वासवाग्भिः रक्षे 'त्य् आहे 'ति भावः । मारुते वेधसि ब्रध्ने पुंसि कः । खनिः स्त्रियाम् आकरः स्यात् । एकत्र करोती 'त्य् आकरः । अदोरप् । व्यसनं विपदि भ्रंशे दोषे कामजकोपजे । पाही 'ति पा रक्षणे ऽस्य लोटि । सुकरे 'ति ईषद् दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् । दरो ऽस्त्रियाम् भये श्वभ्रे । एवं कस्य ब्रह्मणो रमाकर लोकाधिपत्यकर हरे सुकर शोभनहस्त । दरतोदरतोदरतः दरो भयं तस्य तोदो नाशस् तत्र रतम् उदरं यस्य तस्य दरतः शङ्खस्य मरुतां वायूनां विहृतैर् माम् पाहि रक्षे 'ति ध्येयम् ॥४५॥

त्वदरिर् निषधेश समृद्धिम् अनारमया रमया ऽर मया ऽरम् अयाः ।
व्यसनं त्वम् उपैमि कदा नु सभीशमना शम् अनाशम् अनाशमनाः ॥४६॥
यम् अनायमना यमनाय मनाग् अभिवीक्ष्य रतं द्रवती ऽह परः ।
स नृपो निषधक्षितिनाथ गलन् नवमानवमान वमा ऽनवमाः ॥४७॥
नयमानयमान् अयमान यम् आवस एत्य निवासम् अमुम् भवता ।
भवनीयम् अपायम् अरीन् उदयान् नयता ऽनयतानयतान् अयता ॥४८॥

त्वदरिर् इति । हे निषधेश नल त्वदरिः पुष्करः अनारमया अनवसानया रमया लक्ष्म्या रमण्या वा समृद्धिं हर्षम् आर प्राप्तवान् । त्वम् मया सह अरं शीघ्रं व्यसनं विपत्तिम् अयाः गतवान् असि । अनाशमनाः । आशे ऽच्छा तद्रहितम् मनो यस्यास् तादृशी । यद्वा त्वदरिः कथम्भूतः अनाशमनाः न विद्यते नाशो विनाशे मनो यस्य स तथे ऽत्य् अर्थः । सभीशमना भीर् भयं तच्छमनं शान्तिस् तत्सहिता शान्तभीतिः । अनाशं नाशरहितं शं सुखं कदा उपैमि कस्मिन् काले उपगच्छामि । नु पृच्छायाम् । कदा सुखं लप्स्ये इति व्यलपत् । यातेर् लङि अयाः । उपैमी ऽती ऽणः विभाषा कदाकर्ह्योर् इति भविष्यति लट् । नु पृच्छायां विकल्पे च ॥४६॥

यम् अने ऽति । अनायमना अनीतिमना अनीतियुक्तः नय एव नाय अन्यायपर इत्य् अर्थः । यद्वा । आयो धनागमस् तद्रहितमनाः सन् परः शत्रुर् मनाग् ईषत् यमनाय जीवापहारणाय रतम् आसक्तं यं त्वाम् अभिवीक्ष्ये ऽह लोके परः शत्रुर् द्रवति दूराद् एव पलायते । हे निषधक्षितिनाथ निषधेश नल गलन् नवमानवमान गलन् स्खलन् नवमानवास् तरुणास् तेषाम् मानो गर्वो यस्मिंस् तादृक स त्वम् अनवमाः अवमाः अधमाः न अवमाः अनवमाः श्रेष्ठाः नृपः क्रोधान् वम उद्गिर । हे नल यं त्वां कृतानीतिः शत्रुर् हन्तुम् उद्यतम् ईषद् अप्य् आलक्ष्य पलायते स त्वम् परहृतसर्वस्वः ता गिरः कथं नो ऽद्गिरसि वने वने किम् अटसी ऽति भावः । किञ्चिद् ईषन् मनाग् अल्पे । द्रु गताव् इत्य् अस्य लटि द्रवती ऽति । रुट्क्रुधौ स्त्रियौ । टुवम उद्गिरणे ऽस्माल् लोटि उद्गिरे ऽति । निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः ॥४७॥

नयमे ऽति । नयमानयमान् नयो नीतिर् मानो ऽभिमानो यमो विभ्रमो नियमो वा

सनयासनया सनया स न याह्य् असुहृद्घटया विपदं स्वपदम् ।
हितदे ऽहितदेहि तद् एहि तदे ऽत्य् अलपद् बहुधा नरदेवसुता ॥४९॥
सा विधुरा धावन्तं रत्नौघं ध्वा ऽपि निरपराधा ऽवन्तम् ।
सार्थं राधावन्तम् प्रेक्षिष्टा ऽपच् च सुतनुर् आधाव् अन्तम् ॥५०॥

तान् अयमानः प्राप्नुवान् तस्य सम्बोधने हे नयमानयमान् अयमान नीतिम् अभिमानं नियमं च धारयन् यं निवासं राष्ट्रम् एत्य प्राप्य आवसः । यस्मिन् राष्ट्रे ऽतिष्ठः । अमुं निवासम् अयता प्राप्तवता उदयान् उद्गतो ऽयो ज्ञानं येषां तादृशान् अनयतानयतान् अनयो ऽन्यायः तस्य तानो विस्तारस् तत्र यतान् अन्यायासक्तान् अरीन् शत्रून् अपायं नाशं नयता प्रापयता भवता त्वया भवनीयम् भवितव्यम् । हे नल यं निजराज्यम् प्राप्य पूर्वम् आस्थाः पुनस् तद् एव राज्यं गच्छता त्वया शत्रून् विनाशयितुं समर्थेन भवितव्यम् इति तद् एव निजपुरं गच्छे ऽति व्यलपद् इति भावः । आवस इत्य् अस्या ऽऽधारस्य निवासम् इत्य् अस्यो ऽपान्वध्याङ्वस इति कर्मत्वम् ॥४८॥

सनये ऽति । हे हितद हितम् ईप्सितं वस्तु ददाती ऽति हितद नल स त्वं सनयासनया नयो नीतिम् तस्या असनं त्यागस् तत्सहितया त्यक्तनीत्या असुहृद्घटया शत्रुकारिसमूहेन विपदं नाशं न याहि मा ऽगमः । ईहितदेहि ईहिता इष्टा उपकर्तारो देहिनो जना यस्मिंस् तादृशं तत् स्वपदं स्वनगरम् एहि आयाहि । इत्य् अनेन प्रकारेण सनया नीतिसहिता नरदेवसुता भीमभूपपुत्री बहुधा बहुप्रकारं व्यलपद् विललाप । यद्वा । हितदेहितदेहो ऽत्य् एकम् पदं हितदम् ईहितं चेष्टितं येषां ते तादृशा देहिनो यत्र तत् स्वपदं राज्यम् एहि । हे नल एवम् एकाकी शत्रुहस्तम् मा गच्छेः । शत्रव एकाकिनं त्वां दृष्ट्वा ऽपकुर्युस् तस्मात् स्वकीयम् एव नगरं गच्छे ऽति नानाशङ्काकुला भैमी तस्मिन् वने विललापे ऽति भावः । करिणां घटना घटा । या प्रापणे ऽस्य लोटि याही ऽति । पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु । एही ऽती ऽणो लोटि । अलपद् इति लपव्यक्तायां वाचो ऽत्य् अस्य लङि । बहुधा सङ्ख्याया विधार्थे धा । सप्तभिः कुलकम् ॥४९॥

से ऽति । विधुरा विरहिता सुतनुः शोभनाङ्गी सा दमयन्ती निरपराधा ऽपराधरहिता ध्वा ऽपि कस्मिन्न् अपि देशे रत्नौघं रत्नसमूहम् अवन्तं रक्षन्तं सारत्नसमूहं

व्याकुलये 'वा 'रितया विधेर् गतिर् अनेन सिद्धये ऽवारि तया ।
अपि च ययेे वारितया यथा शफर्या जलोच्चये वार् इतया ॥५१॥
प्रतिषिद्धान्यायस्य प्रापि सुबाहोस् च राजधान्य् आयस्य ।

राधावन्तं राधा सम्बद्धिस् तत्सहितं धावन्तं गच्छन्तं सार्थं जनसमूहम् प्रैक्षिष्ट दृष्टवती । आधौ मनःपीडायाम् अन्तम् अवसानं च प्रापत् लेभे । वने ऽटन्ती सार्थम् आसाद्य मनःपीडां जहाव् इति भावः । धाव् गतिशुद्ध्योर् इत्य् अस्य धावन्तम् इति । राध साध संसिद्धाव् इत्य् अस्य षिद्भिदादिभ्यो ऽङ् इत्य् अङि राधे 'ति । प्रैक्षिष्टे 'ती "क्ष दर्शनाङ्कनयोर् इत्य् अस्य लुङि । आपेर् लुङि आपद् इति । सङ्घसार्थौ तु जन्तुभिः । पुंस्य् आधिर् मानसी व्यथा ॥५०॥

व्याकुलये 'ति । विधेर् दैवस्या 'रितया शत्रुत्वेन व्याकुलया इव अत्रा 'पि विधाता शत्रुर् अभूद् इति उद्भ्रान्तये 'व तया दमयन्त्या सिद्धये नलान्वेषणानुरूपकार्यस्य भीमपुरप्राप्तये वा अनेन सार्थेन सह गतिर् गमनम् अवारि भेजे वृता वा । वारितया का त्वं कुत्र यासि इति निवारितया 'पि च यये गतम् । कया यथा । वार् इतया वाः जलम् इतया प्राप्तया शफर्या जलोच्चये जलवृद्धौ यथा । जनोच्चय इति पाठे जनसङ्घे तया यये इत्य् अर्थः । अवारितया इत्य् अकारप्रश्लेषे अनिषिद्धये 'त्य् अर्थः अवाः जलरहितं निर्जलम् इतया शफर्ये 'व । अहम् अपि भवत्सङ्गे समेष्यामी 'त्य् उक्त्वा 'निषिद्धया 'पि भैम्या गतम् इति भावः । भाग्यं स्त्री नियतिर् विधिः । वृञ् सम्भक्ताव् इत्य् अस्य लुङि चिण्य् अवारी 'ति । या प्रापणे इत्य् अस्य भावे लिटि यये । वार् वारि सलिलं कमलजलम् इत्य् अमरः । अत्रे 'यम् भारतवार्ता । तत्र वने गच्छन्तं वणिक्सार्थं सा ददर्श तां च दृष्ट्वा तेषाम् मध्ये कश्चित् शुचिनामा वणिक् का त्वं कस्या 'सि क्व यासि इत्य् आह ततस् तया भीतया स्ववृत्तान्तं कथितं कुत्रा 'पि भवद्भिर् नलो दृष्ट इति पृष्टाः न वयं नलं विद्म इत्य् ऊचुः ततः क्व यास्यथ इत्य् उक्ताः सुबाहुनाम्नश् चेदिराजस्य देशे वाणिज्यार्थं यास्यामः इत्य् ऊचुः ततः तैः सार्धं सा 'पि ययौ इति ॥५१॥

प्रतो 'ति । आयस्य पदगमनेन आयासं कृत्वा । प्रतिषिद्धान्यायस्य प्रतिषिद्धो निराकृतो ऽन्यायो ऽनीतिर् येन तादृशस्य सुबाहोः सुबाहुनाम्नो राज्ञः राजधानी नगरी प्रापि च प्राप्ता च । कीदृशी । बहुधनधान्या बहुतरं धनधान्यं यस्याः

बहुधनधान्या यस्य प्रबभुर् वृन्दानि बहुविधान्य् आयस्य ॥५२॥
सञ्छन्ना मात्रा सानन्दं राज्ञो भृता च नामा ऽत्रासा ।
शोकेना ऽमा ऽत्रा ऽसाव् अवसद् धृतदेहयापनामात्रा सा ॥५३॥

सा यस्य सुबाहोः आयस्य धनागमस्य बहुविधानि नानाप्रकाराणि वृन्दानि समूहाः प्रबभुः रेजिरे । एवं सार्थेन सह भ्रान्त्या भैम्या आयासेन सुबाहुपुरी प्राप्ते ऽति भावः । प्रापे ऽत्य् आपेर् लुङिचिणि । प्रबभुर् इति भातेर् लिटि ॥५२॥

सञ्छन्ने ऽति । असौ दमयन्ती सञ्छन्ना वपुर्मालिन्यात् दमयन्ती ऽति ज्ञातुम् अशक्या राज्ञः सुबाहोर् मात्रा सानन्दं यथा स्याद् एवम् भृता नाम पोषिता । नाम सम्भावनायाम् । अत्र सुबाह्वन्तःपुरे अत्रासा त्रासरहिता धृतदेहयापनामात्रा धृतं देहयापना शरीरस्थितिमात्रं यया सा तादृशी देहधारणार्थम् भुङ्क्ते न तु सौख्यार्थम् इति भावः । शोकेन अमा शोकसहिता सा भैमी अवसत् वासम् अकरोत् । यद्वा । धृता देहनिर्वाहमात्रे आशा यये ऽति सा धृतदेहयापनामा-त्राशे ऽत्य् एकम् पदम् । अत्र पक्षे यमके शसयोर् अभेदो न दोषाय

यमकश्लेषचित्रेषु रलयोर् डलयोर् न भित् ।
ना ऽनुस्वारविसर्गौ च चित्रभङ्गाय सम्मतौ ॥

इति यावत् । असौ भैमी सुबाहुमात्रा दमयन्ती ऽत्य् अनभिज्ञाय सानन्दम् अपुषत् सा च शरीरत्राणमात्राहारा ऽभूद् इति भावः । अवसद् इति वसेर् लङि । अत्रे ऽयम् भारतवार्ता । सायाह्ने भैमी वणिग्भिः सार्धं सुबाहुनगरम् प्राप्ता अथ प्रासादस्था राजमाता तां दृष्ट्वा धात्री द्वारा स्वसमीपम् आनीय का त्वम् इति प्रोवाच ततः दमयन्त्याः परिचारिका ऽहम् इति भैम्य् आह राजमाता ऽवाच अत्र तिष्ठ ततो भैमी निर्बन्धं चकार पादसेवनम् उच्छिष्टभोजनं न करिष्यामी ऽति ॥५३॥

पदे ऽति । अपदा अत्राणा अस्थाना वा या दमयन्ती नयेन नीत्या कृत्वा आपदा विपत्त्या पदा चरणेन वनावनौ वनभूमौ अनाथवत् परिभ्रमम् पर्यटनम् आपत् लेभे । सा सजीवनावना जीवनं तस्य अवनं रक्षणं तत्सहिता सञ्जी-वितरक्षा ऽभवत् । या भैमी विपदि चरणाभ्यां वनभूमौ पर्यभ्रमीत् सा जीव-

पदा ऽपदा परिभ्रमं नयेन या ऽपद् आपदा ।
वनावनाद् अनाथवत् सञ्जीवनावना भवत् ॥५४॥

इति श्रीकालिदासकृते नलोदये सत्काव्ये तृतीयोच्छ्वासः

॥ ३ ॥

नत्त्वणाम् प्रापे ऽति भावः । पद् अङ्घ्रिम् चरणा ऽस्त्रियाम् । आपद् इत्य् आपेद् लाङि । विपत्त्यां विपदापदौ । अभवद् इति भवतेर् लाङि ॥५४॥

इति श्रीनलोदयकाव्यटीकायां सुबोधिन्यां तृतीयोच्छ्वासः

॥ ३ ॥

अथ तुङ्गोपायस्य श्रवणेन नलस्य सानुगो ऽपायस्य ।
वशगा गोपा यस्य स्वमनो भीमश् चिरं जुगोपा ऽयस्य ॥१॥
निशि च दिवा चा ऽर्यस्यक्षतस्य नलविचितये ऽथ वाचा ऽर्यस्य ।
भृशम् एवा ऽचार्य् अस्य द्विजोत्तमैः शिष्यकैर् इवा ऽचार्यस्य ॥२॥
अथ नयनेत्रा सादिप्रचुरा पूः केनचिज् जने ऽत्रा ऽसादि ।

अथे ऽति । अथा ऽनन्तरं तुङ्गोपायस्य तुङ्ग उच्च उपायः सामादिर् यस्य तादृशस्य नलस्य अपायस्या ऽपक्रमणस्य दुःखस्य वा श्रवणेन सानुगः अनुगच्छन्ती ऽत्य् अनुगास् तैः सहितः सानुचरः चिरम् बहुकालम् आयस्य प्रयासं कृत्वा नलान्वेषणाय भीमः स्वमनः स्वस्य मानसं जुगोप रक्षितवान् । यस्य भीमस्य गोपाः गाम् भूमिम् पान्ती ऽति गोपाः राजानः ग्रामौघाधिकारिणो वा गोपजातीया वा वशगा आयत्ताः । नलापगमनं श्रुत्वा तदन्वेषणार्थम् बहुधा आयस्य शोकसहितं स्वहृत् कथञ्चिद् अरक्षत् । गोपो गोपालके गोष्ठाध्यक्षे पृथ्वीपतौ अपि । ग्रामौघाधिकृते पुंसी ऽति मेदिनिकरः । स्थायुको ऽधिकृतो ग्रामे गोपो ग्रामेषु भूरिषु इत्य् अमरम् च ॥१॥
निशी ऽति । अस्य भीमस्य वाचा वचनेन द्विजोत्तमैर् ब्राह्मणश्रेष्ठैर् नलविचितये नलान्वेषणाय निशि रात्रौ च दिवा च दिवसे भृशम् एवा ऽत्यर्थम् एव अचारि नानादेशसञ्चरणम् अकारि । कीदृशस्या ऽस्य । अर्यस्यक्षतस्य अरेः असयः अर्यसयस् तैः शत्रुखड्गैर् अताडितस्य । एवम् आर्यस्य श्रेष्ठस्य आचार्यस्य गुरोर् वचसा शिष्यकैर् इव शिष्यैर् इव । स्वार्थे कः । शिष्या यथा गुरोर् आज्ञया ऽहर्निशं सञ्चरन्ति तथे ऽत्य् अर्थः ॥२॥
अथे ऽति । अथा ऽनन्तरम् अत्र जने विषये केनचिद् अनिर्वचनीयचतुरेण गुरुचना-म्ना द्विजेन नयनेत्रा नीतिनिपुणेन सादिप्रचुरा सादिनो ऽश्ववाहाः प्रचुरा यस्यां

यत्र सुनेत्रा सा दिग्भ्रमेण दुःखं गता वने त्रासादि ॥३॥
सह दीना ऽयत तेन स्वगृहम् भैमी यये ऽमुना ऽयततेन ।
स्वनयेना ऽयततेनप्राप्त्यै स्वासोम् च शोभना यतते न ॥४॥
वसनांशस्य स्तेन ह्या ऽसि ममा ऽयं विधिर् यशस्यस् ते न ।

सा पूः आसादि प्राप्ता । सा का । यत्र पुरि सा सुनेत्रा भैमी वर्तत इति शेषः । कीदृशी सा । वने दिग्भ्रमेण दिग्भ्रान्त्या त्रासादि त्रासपूर्वकं दुःखं गता प्राप्ता । दिग्भ्रमेणे ऽत्य् अत्र आदिक्रान्त्या इति पाठे यत्र पुरि आदिक्रान्त्या प्रथमप्रवेशेन जने लोके त्रासादि भवति यत्र पुरि वने दुःखं गता सा सुनेत्रा आसीद् इत्य् अर्थः ॥३॥

सहे ऽति । दीना दुःखिता भैमी तेन द्विजेन सह स्वगृहम् आयत गतवती । चेदिपुरीनिलयम् ब्राह्मणं गृहीत्वा स्ववासस्थाने गतवती । आयततेन धनागमव्याप्तेना ऽमुना द्विजेन सह भैम्या यये भीमगृहम् प्रती ऽति शेषः । चेदिराजदत्तधनवता द्विजेन सह भैमी भीमगृहम् अगाद् इति भावः । यद्वा । नलान्वेषणाय भीमदत्तबहुधनवता विप्रेण भैम्या सह चेदिगृहं यये इत्य् अर्थः । शोभना सा भैमी स्वनयेन स्वनीत्या अयततेनप्राप्त्यै अयः शुभविधिस् तेन ततो व्याप्तो य इन स्वामी नलस् तस्य प्राप्त्यै यतते स्म यत्नम् अकरोत् । स्वासोः स्वकीयप्राणस्य प्राप्त्यै न यतते स्म । अत्रे ऽयम् भारतवार्ता । सुनन्दान्तःपुरे समागतं सुदेवम् ब्राह्मणं दृष्ट्वा दमयन्ती रोद । सुदेव उवाच । अहं तव भ्रातुः सखा सुदेवनामा भीमवचनात् त्वाम् अन्वेष्टुम् आगतः तव बान्धवास् त्वां विना मृता इव तिष्ठन्ति ततो राजमातरं सर्ववृत्तान्तम् अकथयत् सुबाहुमाता च नलपत्नीं दमयन्तीं ज्ञात्वा आलिङ्गय सान्त्वयामास सुनन्दा तु निश्चयार्थं तस्या गात्रमलं दूरीकृत्य शिरस्य् अर्धचन्द्राकारं गरुडलाञ्छनं ददर्श । तच्चिह्नेन सुदृढं ज्ञात्वा मम भगिन्याः कन्या त्वम् इत्य् उक्त्वा राजमाता ताम् अलङ्कृत्या ऽमात्यैः सुदेवेन च सहितां दमयन्तीम् पितृगेहम् प्रापयत् तत्र सा पुत्रादिभिः सह युयोज । भीमश् च सुदेवाय पुनः पुनः प्रणामं कृत्वा बहुधनानि ददौ । ततो नलान्वेषणार्थम् पुनर् ब्राह्मणान् प्रेषयामास इति ॥४॥

वसने ऽति । नयम् एवा ऽऽह । हे वसनांशस्य वस्त्रखण्डस्य स्तेन चौर नल त्वं

छद्म विशस्य् अस्तेन स्वजनेन भृतेन भवसि शस्यस् तेन ॥५॥
स जनस् तेना 'गादिक्रामी 'ति जनेन तन्मतेना 'गादि ।
भर्तृकृते नागादिस्यदेन भुवि वस्तुपरिह्वितेना 'गादि ॥६॥
को ऽप्य् ऊचे तनयायाः पदम् एत्य नृपस्य तेषु चे 'तनयायाः ।
भीरु मुञ्चेत न यायाद् अर्तिस् त्वां दुःसह्या च चेतनया या ॥७॥

ह्या 'सि । मम दमयन्त्या अयं विधिः वनगमनादिस् ते यशस्यो न यशसे न । हे प्रिय अस्तेन त्यक्तेन स्वजनेन स्वबन्धुना कृत्वा छद्म कपटं विशसि प्राप्नोषि । भृतेन पालितेन तेन स्वजनेन शस्यः स्तुत्यो भवसि । स्वबन्धु-पालनेन कीर्तेर् उदयस् तत् तु त्वया न कृतम् इति भावः ॥५॥

स जने 'ति । अगादिक्रामी पर्वतादिक्रमशीलः स जनः प्रेष्यजनः भर्तृकृते नलार्थे तन्मतेन भैम्या ज्ञातेन केनचिद् अन्तःपुरचारिणा जनेन इति पूर्वोक्तश्लोक्ति-प्रकारेणा 'गादि उक्तः । तथा च अस्य पूर्वोक्तश्लोकस्या 'र्थं ज्ञात्वो 'त्तरं यो ददाति तदा ''गत्य कथये 'त्य् उक्तः ततस् तेन जनेन प्रेष्यलोकेन । नागा-दिस्यदेन नागं सर्पम् अत्ती 'ति नागादो गरुडस् तद्वत् स्यदो वेगो यस्य तेन वस्तुपरिह्वितेन नागरीयवस्तुत्यक्तावता छद्मचारिणा इत्य् अर्थः भुवि भूमौ अगादि पूर्वोक्तश्लोकस्य को ऽर्थ इति अवादि । स प्रेष्यलोको दमयन्त्यनु-मतेन केना 'प्य् अन्तःपुरचारिणो 'क्तः । एतदभिज्ञाने नलस्ये 'ति दमयन्त्ये 'व ग्राहितसञ्ज्ञः नलान्वेषणाय श्लोकार्थम् पृच्छन् पर्यचारीद् इति भावः । रंहस्तरसी तु रयः स्यदः । शैलवृक्षौ नगाव् अगौ ॥६॥

को ऽप्य् ऊच इति । तेषु अन्वेषकेषु मध्ये को ऽप्य् अन्वेषकः जनः इतनयायाः इतः प्राप्तो ज्ञातो वा नयो यया तादृश्याः ज्ञातनीतेर् नृपस्य भीमस्य तनया-याः पदं स्थानम् एत्य ऊचे उक्तवान् । हे दमयन्ति त्वाम् भीरु भयम् मुञ्चेत त्यजेत् । अर्तिः पीडा च न यायात् न गच्छेत् भयम् अर्तिश् च न भविष्यती 'ति यावत् । या अर्तिः चेतनया बुद्ध्या दुःसहा सोढुम् अशक्या । हे दमयन्ति त्वाम् भयम् पीडा च हास्यति नलो मया लक्षित इत्य् अवोचद् इति भावः । पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु । भीतिर् भीः साध्वसम् भयम् । मुच्लृ मोक्षणे इत्य् अस्या ''त्मनेपदे शे मुचादीनाम् इति नुमि मञ्चेते 'ति

निजधामेतं समयाम् ऋतुपर्णं श्रावितो ऽर्थम् एतं स मया ।
सचिवसमेतं समया गिरो 'त्तरं ना 'ज्ञानिष्ट मेतं समया ॥८॥
दीनान् आयतनस्थो नानायतनक्षमो ऽस्य सौत्ये ऽधिकृतः ।
ना 'नायतनकरो लीनान् आयत नः पथ्य् उवाचा 'थ रहः ॥९॥

रूपम् । मतिर् मनीषा बुद्धिर् धीर् धिषणा ज्ञप्तिचेतने इति हेमचन्द्रः । आर्तिः पीडा धनुःकोट्योर् इत्य् अमरः ॥७॥

निजे 'ति । हे दमयन्ति निजधामेतं निजस्थानम् अयोध्या तत्रे 'तं तत्र स्थितम् अयोध्याधीशम् ऋतुपर्णम् ऋतुपर्णनामानं राजानं समयां समागतः । स च मया एनम् अर्थं वसनस्तेन्यादिरूपम् अर्थं वाच्यं समया सश्रीकया समया अनतिनिम्नोन्नतया गिरा वाचा श्रावितः सचिवसमेतम् मन्त्रिसमेतं तथा मेतम् मां लक्ष्मीम् इतम् प्राप्तम् ऋतुपर्णं समया मन्त्रिसहितस्य ऋतुपर्णस्य समीपे उत्तरम् प्रतिवाक्यं ना 'ज्ञानिष्ट न ज्ञातम् । हे भैमि वसनस्तेनादिकं त्वदुक्तं श्रावित ऋतुपर्णः । मन्त्रिसहितस्य तस्य समीपे उत्तरं च ना 'वाप्तम् इति भावः । अभितः परितः समये 'ति द्वितीया ऋतुपर्णम् इति । मन्त्री धीसचिवो ऽमात्यः । समयाम् इति यातेर् लङि । समया 'न्तिकमध्ययोर् इति मेदिनिकरः । अज्ञानिष्टे 'ति दीपजनेत्यादिना चिण् तद्विकल्पे रूपम् ॥८॥

दीने 'ति । अथा 'नन्तरम् अस्य ऋतुपर्णस्य आयतनं गृहं तत्र स्थितः सौत्ये सारथ्ये ऽधिकृतः । अनायतनकरः न आयतो दीर्घः करो हस्तो यस्य तादृशः कुब्जो ना पुरुषः पथि लीनान् मार्गे लग्नान् गच्छतः नो ऽस्मान् दीनान् दुःखितान् रहः विविक्ते आयत आगतवान् इति उत्तरश्लोके वक्ष्यमाणं च उवाच अवादीत् । कीदृशः । नानायतनक्षमः नानाप्रयत्नसमर्थः त्वदुक्तं श्रावयित्वा 'प्राप्तोत्तरान् मार्गे गच्छतो ऽस्मान् सङ्कुचितकरस् तत्स्तो रहसि एत्ये 'दम् उवाचे 'ति भावः । गुणवचनब्राह्मणादिभ्यः कर्मणि चे 'ति ष्यञि सौत्यः । सूतस् त्वष्टरि सारथौ । आयते 'त्य् अय गताव् इत्य् अस्य लङि । मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्व् अथो अथ । रहो ऽन्तिकम् उपह्वरे । यद्वा दीनानायतनस्थ इति नलविशेषणं दीनस्थ् चा 'सौ अनायतनस्थः असम्यग् आयतनस्थम् चे 'ति तादृश इत्य् अर्थः ॥९॥

दीनाया 'नायतया विवाससे ऽस्मै विहीनयानाय तया ।
न खलु धिया 'नायतया क्रोद्धव्यं धर्मनिश्चयान् आयत या ॥१०॥
कृतकर्मा 'नेन त्व् आगतो ऽस्मि वचसे 'ति तस्य मानेन त्वा ।
वेदयमाने नत्वा विप्रे च धनेषु दीयमानेनत्वा ॥११॥

दीने 'ति । आगत्य किम् उवाचे 'त्य् आह । दीनाय दुःखिताय अनायतया आयो धनागमः न आयो यस्या 'साव् अनायस् तद्भावस् तत्ता तया धनागमरहितत्वेन । विवाससे वस्त्रहीनाय तस्मै वसनस्तेनाय । एवं विहीनं त्यक्तं यानं येन तादृशाय । अनायतया अदीर्घतया अविचारपूर्विकया धिया बुध्या तया दमयन्त्या न क्रोद्धव्यं क्रोधो न कर्तव्यः । खल्व् अनुनये । तया कया । या धर्मनिश्चयान् धर्मनिर्णयान् आयत गतवती या 'तिधार्मिकी । धनागमरहितत्वेन दीनाय वसनहीनाय च तस्मै नलाय तया दमयन्त्या क्रोधो न करणीयः । दैववशाद् एतत् सर्वम् अभूद् इति भावः । क्रुधद्रुहेर्ष्यासूयार्थनायाम् । यम् प्रति कोप इति सम्प्रदानत्वाच् चतुर्थी अस्मै इति । आयते 'त्य् अय गताव् इत्य् अस्य लङि ॥१०॥

कृते 'ति । प्रेष्यद्विज आह । हे दमयन्ति मानेन प्रमाणेन सत्येन तस्य पुरुषस्य अनेन वचसा वचनेन कृतकर्मा कृतकार्यो ऽहं त्वा त्वाम् प्रत्य् आगतो ऽस्मि इति वेदयमाने बोधयति द्विजे ब्राह्मणे नत्वा नमस्कृत्य धनेषु दीयमानेनत्वा दीयमानम् इनत्वं स्वामित्वं यया तादृशी । धनेषु दत्तस्वामित्वा सा "सीद् इत्य् अर्थः । अहं तस्य पुरुषस्य सत्येन वचसा कृतकृत्यस् त्वत्समीपम् आगत इति वदति विप्रे नमस्कृत्य बहुधनस्वामित्वम् अकार्षीद् इत्य् अर्थः । इनः सूर्ये प्रभौ राज्ञि । अत्रे 'यम् पुराणवार्ता । दमयन्ती च नानास्तुतिं कृत्वा पर्णादनामानम् ब्राह्मणम् ऋतुपर्णराजसारथिनिकटे श्लोकचतुष्टयं दत्वा प्रेषयामास स च तत्र गत्वा तस्मै श्लोकान् ददौ । श्लोका यथा ॥

क्व नु त्वं कैतविन् छित्वा वस्त्रार्धम् प्रस्थितो मम ।
उत्सृज्य विपिने सुप्ताम् अनुरक्ताम् प्रियाम् प्रिय ॥१॥
सा वै यथा समादिष्टा तथा "स्ते त्वत्प्रतीक्षिणी ।
दह्यमाना भृशम् बाला वस्त्रार्धेना 'पि संवृता ॥२॥
अस्या रुदन्त्याः सततं तेन शोकेन पार्थिव ।

तत्रा ऽपर्णाय ततस्वनयाद् भैमी तपस्य् अपर्णा ऽयतत ।
तुलितसुपर्णाय ततस् तस्या ऽऽगमनाय सर्तुपर्णाय ततः ॥१२॥

प्रसादं कुरु वै वीर प्रतिवाक्यं ददस्व च ॥३॥
मा कुरुष प्राणनाथ विफलं जीवनम् मम ।
यदि तिष्ठन् न वक्ता ऽसि स्त्रीहत्या त्वाम् अभिस्पृशेत् ॥४॥
इति पर्णादब्राह्मणाद् वृत्तान्तं श्रुत्वा नलो ऽवाच ॥
क्व नु सा क्षुत्पिपासार्ता श्रान्ता शेते तपस्विनी ।
स्मरन्ती तस्य मन्दस्य कं वा सा ऽद्य ऽपतिष्ठते ॥
इति कथयित्वा श्लोकपञ्चकम् प्रस्थापयामास ॥ यथा ॥
वैधव्यम् अपि सम्प्राप्य गोपयन्ति कुलस्त्रियः ।
आत्मानम् आत्मना सद्यो जितस्वर्गा न संशयः ॥१॥
रहिता भर्तृभिः सद्यो न क्रुध्यन्ति कदाचन ।
प्राणांम् चारित्रकवचान् धारयन्ति कुलस्त्रियः ॥२॥
विषमस्थेन मूढेन परिभ्रष्टसुखेन च ।
यत् सा तेन परित्यक्ता न तत्र क्रोद्धुम् अर्हति ॥३॥
प्राणयात्राम् परिप्रेप्सोः शकुनैर् हृतवाससः ।
आधिभिर् हन्यमानस्य न श्यामा क्रोद्धुम् अर्हति ॥४॥
सत्कृता ऽसत्कृता वा ऽपि पतिं दृष्ट्वा तथागतम् ।
राज्यभ्रष्टं श्रिया हीनं न श्यामा क्रोद्धुम् अर्हति ॥५॥
इति श्लोकपञ्चकं नीत्वा आगत्य दमयन्तीं श्रावयामास पर्णाद इति ॥११॥

तत्रे ऽति । ततस् तदनन्तरं तत्र तस्मिन् काले ततो ऽयोध्यायाः पञ्चम्यास् तसिल् सर्तुपर्णाय ऋतुपर्णसहिताय तस्य नलस्या ऽपर्णाय अपगतम् ऋणं यस्मिंस् तादृशाय नलप्रेरितहयानाम् एकदिवसेन बहुयोजनाध्वलङ्घनाद् ऋणापगमः । तुलितः सुपर्णो गरुडो येन तादृशाय आगमनाय तपसि शरीरसन्तापलक्षणे एकभक्तोपवासादौ अपर्णा पार्वती इव भैमी दमयन्ती ततस्वनयात् ततो विस्तृतो यः स्वनयः स्वनीतिस् तस्माद् अयतत यत्नं समास्थित । तदनन्तरं दमयन्ती बहुविशालस्वनीतेर् अयोध्यातो नलस्य सर्तुपर्णस्या ऽऽगमनाय यत्नं कृतवती ऽति भावः । स्याद् ऋणम् पर्युदसनम् । ऋणम् आधमर्ण्य इति निपातः । यतो प्रयत्न इत्य् अस्य लङि ॥१२॥

सा कृतसामा 'न्येन आवितवत्य् अमुम् अनन्यसामान्येन ।
स्वं रहसा मान्येन स्वयंवरं स्मरति ना 'ञ्जसा मान्य् एनः ॥१३॥
रहसि तदा सन्नाहस्थितः स्मरयुतो नलम् मुदा सन् आह ।
श्रीस् तु मदासन्ना ह स्फुटम् प्रयामो व्रजेद् व्युदासं ना 'हः ॥१४॥

सा कृते 'ति । कृतसामा कृतं साम सान्त्वं यया तादृशी सा 'नन्यसामान्येन अन्यासाधारणेन । अन्येना 'परेण मान्येन पूज्येन विप्रेणा 'मुम् ऋतुपर्णं रहसा एकान्तेन स्वं स्वकीयं स्वयंवरं आवितवती अशिश्रवत् पूर्वपरिणीता परिणयनान्तरं कर्तुं कथम् प्रवर्तते तत्रा "ह । मानी अभिमानी अञ्जसा झटिति एनः पापं न स्मरति । सा दमयन्ती अन्येन केना 'पि द्विजेन स्वं स्वयंवरम् उपह्वरे ऋतुपर्णं आवितवती । यतो मानी झटिति पापं न स्मरति । ऋतुपर्णः स्वयंवरं श्रुत्वा शीघ्रम् एष्यति तेन सह नलो ऽप्य् आगमिष्यती 'ति भावः । स्याग् झटित्य् अञ्जसा 'ह्नाय द्राक् मङ्क्षु सपदि द्रुते । स्वो ज्ञाताव् आत्मनि स्वं त्रिष्व् आत्मीये स्वो ऽस्त्रियां धने इत्य् अमरः । अत्रे 'यम् पुराणवार्ता । दमयन्ती मातरम् उवाच । सुदेवो यातु ऋतुपर्णं वदतु भैमी पुनः स्वयंवरं करिष्यति स तु श्वो भावी यदि द्रष्टुम् इच्छा तदा गच्छ तच् छ्रुत्वा तन्माता तथा 'करोत् । ऋतुपर्णो ऽपि सुदेवात् तच् छ्रुत्वा गमनं निश्चित्य नलेन पराम्रषत इति ॥१३॥

रहसी 'ति । तदा सुदेवात् स्वयंवरवृत्तान्तश्रवणकाले स ऋतुपर्णः सन्नाहस्थितः सन्नाहे कवचे स्थितः बद्धकवचः मुदा हर्षेण युतः रहसि एकान्तेन नलम् इति आह उवाच इती 'ति किं हे सन् पूज्य अहः दिनं व्युदासं नाशं न व्रजेत् न गच्छेत् वयं दमयन्तीपुनःस्वयंवरे स्फुटम् प्रव्यक्तम् प्रयामो गच्छामः । श्रीस् तु लक्ष्मीस् तु दमयन्तीलाभात् तद्रूपा वा मदासन्ना मदन्तिकगता भवेत् । ह सम्बोधने । रहसी 'त्य् अत्र हरसी 'ति पाठे त्वं हरसि चेद् वहसि चेत् तदा स्फुटम् प्रयाम इत्य् अर्थः । क्वचित् तु द्वितीयचरणे स्मरयुतो नलम् मुदा सन् आह इति पाठस् तत्र स्मरयुतः सन् कामार्तः सन् मुदा हर्षेण नलम् आह इत्य् अर्थः । हे नल मां चेद् धरसि तदा 'द्य प्रयामो भीमपुरं दिवसो न नाशं व्रजेत् । अद्यै 'व मां नय दमयन्तीवरितुं गन्तव्यम् एवे

सा वनिता बध्वा नः स्वगुणैः कर्षति च के हृता वध्वा न ।
स महस् तावद् ध्वानः श्व इति योजनशतम् मिताव् अध्वा नः ॥१५॥
तत् त्वरया मा यामः प्रणयेर् यदि मा ऽनितत्रियामायामः ।
नलजायामायाम् अस्मृत्वे ऽत्य् ऊचे क्व दुर्धियाम् आयामः ॥१६॥

ऽति भावः । अस गताव् इत्य् अस्या ऽनेकार्थत्वात् । हरसि हृञो लटि । व्रजेत् व्रजेर् लङि । समीपे समया ऽसन्न सन्निकृष्ट सनीड (वत्) ॥१४॥

से ऽति । सा वनिता भैमी स्वगुणैर् आत्मगुणैर् बध्वा संयम्य नो ऽस्मान् कर्षी आकर्षति । यमके बवयोर् ऐक्यं न दोषाय

उलयो रलयोश् चै ऽव शसयोर् बवयोस् तथा ।
वदन्त्य् एषां हि सावर्ण्यम् अलङ्कारविदो जनाः ॥

इत्य् आलङ्कारिकवचनात् । च पुनर् वध्वा स्त्रिया के न हृताः । अपि तु सर्व एव हृता इति भावः । स महस् तावत् स स्वयंवरोत्सवः तावत् श्वः आगामिदिवसे इत्य् अनेन प्रकारेण ध्वानः लोकध्वनिः लोकवार्ता ऽस्तो ऽति यावत् । नः अस्माकम् अध्वा मार्गः योजनशतम् मितौ प्रमाणे वर्तते । हे बाहुक भैमीस्वयंवरः श्वो भविते ऽति लोकवार्ता । अस्माकम् मार्गः शतयोजनमितः अतः शीघ्रं रथं सज्जीकुरु इति भावः । नारी सीमन्तिनी वधूः । बध बन्धन इत्य् अस्मात् क्त्वा बध्वे ऽति । कृष विलेखन इत्य् अस्माद् भौवादिकाल् लटि कर्षती ऽति । मह उद्धव उत्सवः । ह्यो गते ऽनागते ऽह्नि श्वः परश्वस् तु परेद्यवि । अयनं वर्त्ममार्गाध्वपन्थान इत्य् अमरः ॥१५॥

तत् त्वरे ऽति । हे सूत तत् तस्मात् अनितत्रियामायामः अनितो ऽप्राप्तः त्रियामाया रात्रेर् यामः प्रहरो येन तादृक् त्वं त्वरया सम्भ्रमेण मा मां यदि प्रणयेर् नयसि तदा अमा समीपं सह वा यामो गच्छाम इति । अनेन प्रकारेण नलजायामायां नलजायाया दमयन्त्याः मायां व्याजम् अस्मृत्वा अविचिन्त्य ऊचे । यतो दुर्धियां दुष्टाः कामक्रोधवशाक्रान्ताश् च ता धियश् चे ऽति तासां दुष्टबुद्धीनाम् आयामो दैर्घ्यविचारपरम्परा क्व कुत्र । अपि तु कुत्रा ऽपि न । अथवा दुष्टाः धियो येषां ते तादृशानाम् पुंसाम् आयामो विचारदैर्घ्यं क्व । क्वचित् तु दुर्धियाम् इत्य् अत्र युवधियाम् इति पाठः तत्र यूनां तरुणानां धियाम् बुद्धीनां क्व आयामो दैर्घ्यम् अपि तु क्वा ऽपि ने ऽत्य् अर्थः । रात्रिप्रहरमध्ये मां यदि

माम् भजमाना श्वः स्यान् नूनम् असौ तत् प्रणोद्यमानाश्वः स्याम् ।
इति मतिमान् आश्वस्या ऽन्यायम् अनाशङ्क्य विकृतिमान् आशु अस्याम् ॥१७॥
अथ रथम् आरा ऽवन्तं शस्त्राणि नलः प्रुभाश्वम् आरावन्तम् ।
स जगामा ऽरावन् अन्तं नृपतिं चा ऽरोप्य गुरुतमारावं तम् ॥१८॥

नयसि तदा भैमीस्वयंवरं व्रजामी ऽत्य् उक्तवान् दमयन्तीव्याजम् अजानान एवे ऽति भावः । दैर्घ्यम् आयाम आनाहः । अस्मदो द्वयोश् चे ऽत्य् एकत्वे बहु-वचनम् । सम्भ्रमस् त्वरा । अमा सह समीपे च । प्रणयेर् इति णीञो लि-ङि । मात्वामौ द्वितीयाया इति मादेशः ॥१६॥

माम् इति । आदिकुलकं तत्प्रचोद्यमानाश्वः तेन बाहुकेन प्रचोद्यमानाः प्रेर्यमाणा अश्वा यस्य एतादृक् चेत् स्याम् भवेयं तदा ऽसौ दमयन्ती श्वो नूनं निश्चयेन माम् भजमाना आश्रयन्ती स्याद् इति मतिमान् एवम् बुद्धिसहितः स ऋतु-पर्णः अस्यां दमयन्त्याम् अन्यायम् परस्त्र्यभिलापलक्षणम् अनाशङ्क्य आश्वस्य आश्वासम् प्राप्य आशु शीघ्रं विकृतिमान् मनोविकारवान् इत्य् ऊचे इति पूर्व-श्लोकेना ऽन्वयः । यद् असौ मां नयति तर्हि श्वः सा मां वृणीते ऽति परस्त्र्य-भिलापम् अबुध्वा विकारवान् नलं तथो ऽवाचे ऽति भावः । नूनं तर्के ऽर्थनि-श्चये । यद्वा । मतिमान् नलः मनसि आश्वस्य स्वयंवरवार्तां श्रुत्वा उत्पन्नकोपं विचारेण शमयित्वा अस्यां दमयन्त्याम् अन्यायम् अनाशङ्क्य अमत्वा चेत् यदि प्रचोद्यमानाश्वः स्यां तदा असौ दमयन्ती श्वः प्रातःकाले भजमाना स्यात् इति हेतोः आशु शीघ्रं विकृतिमान् रोमाञ्चितः स्यात् बभूवे ऽत्य् अर्थः ॥१७॥

अथे ऽति । अथ वचनानन्तरं नलः आरावन्तम् आ समन्तात् अरं शीघ्रगम् अवन्तम् । यद्वा अरनम् आरः शीघ्रगतिः तम् अवन्तं रक्षन्तं यद्वा आ समन्तात् अरं शी-घ्रम् अवन्तं गच्छन्तं यद्वा अस्य विष्णोः अरं चक्रम् आरं तम् इव अवन्तं गच्छन्तम् अतिशीघ्रगम् इत्य् अर्थः तं शस्त्राणय् आयुधानि अवन्तं रक्षन्तं शुभाश्वम् च शोभना अश्वा यस्मिंस् तादृशं गुरुतमः गरिष्ठतम आरावः शब्दो यस्य ता-दृशं रथम् आर गतवान् च पुनः अरौ शत्रौ अन्तं नाशकं तं नरेन्द्रम् ऋतुपर्णं रथम् आरोप्या ऽरोह्वा जगाम भीमनगरं गतवान् । ऋतुपर्णवचनोत्तरम् ऋतु-पर्णं रथम् आरोप्य कुण्डिननगरम् अनयद् इति भावः । जगामे ऽति गमेर्

स्वांसकृतावसनस्य क्षणाद्दूरत्वेन सङ्गताव् असनस्य ।
भूभर्ता वसनस्य व्यस्मयत रथद्रुतेर् धुताव् असनस्य ॥१९॥
फलगणानाद् अक्षस्य व्यधित तदा सो ऽश्वनोदनाद्दक्षस्य ।
तपसि च ना दक्षस्य प्रहर्षणं हृदयबोधनाद् अक्षस्य ॥२०॥

लिटि । अन्तो ऽध्यवसिते मृत्यौ स्वरूपे निश्चये ऽन्तिके । अरं शीघ्रे च चक्राङ्गे शीघ्रगे पुनर् अन्यवत् इति मेदिनिकरः ॥१८॥

स्वांसे 'ति । भूभर्ता ऋतुपर्णः स्वांसकृतावसनस्य स्वस्या 'से स्कन्धे कृतम् आवसनम् आच्छादनं येन तादृशस्य वसनस्य रथद्रुतेः रथवेगाद् उत्पन्नस्य असनस्य वायोर् धुतौ कम्पे सति असनस्या 'सनवक्षस्य सङ्गतौ सङ्गमे क्षणाद्दूरत्वेन क्षणाद् एव बहुयोजनान्तरितत्वेन व्यस्मयत विस्मितो बभूव । नलप्रेरितरथवेगवशोद्धवमरुद्धृतोत्तरीयस्य क्षणाद्दूरत्वाद् ऋतुपर्णो ऽद्भुतायमानमना अभूद् इति भावः । स्कन्धो भुजशिरो ंसो ऽस्त्री 'त्य् अमरः । अस्यती 'त्य् असनो वायुः समीरपर्यायः । यद्वा । स्वांसकृतावसनस्ये 'त्य् अस्य स्वांसे स्वस्कन्धे कृतम् अवसनम् अस्थितिर् येन तस्य रथवेगोद्भूतवायुनो 'ड्डीयमानस्ये 'त्य् अर्थः । अत्रे 'यम् पुराणवार्ता । स्वांसाद् उत्तरीये भ्रष्टे राजा बाहुकम् उवाच । अश्वान् संयच्छ वार्ष्णेयनामा 'परसारथिः उत्तरीयम् आनयतु । बाहुक उवाच । बहुयोजनान्तरितं तद् अतो ना 'नेतुं शक्यम् इति ॥१९॥

फले 'ति । स ना पुरुष ऋतुपर्णः अक्षस्य द्यूतस्य हृदयबोधनाद् धृदयज्ञानाद् धेतोर् अक्षस्य कलिद्रुमस्य फलगणानात् फलपरिसङ्ख्यानाद् अश्वनोदनादक्षस्य अश्वानां नोदना वाहनं तत्र दक्षस्य चतुरस्य तपसि च तपोविषये दक्षस्य दक्षप्रजापतिसदृशस्य नलस्य प्रहर्षणम् आह्लादनं व्यधित चक्रे यतो ऽयं राजा फलगणानादक्षः अतः पाशकगणनाकोविदो ऽपि स्यात् एतां विद्यां नीत्वा पुनर् जेष्यामी 'ति कृत्वा नलस्य महाहर्षो ऽभूद् इति पर्यवसितार्थः । स ऋतुपर्णो विभीतकफलस्ये 'यत्ताकथनाद् अश्वहृदयज्ञस्य नलस्य प्रहर्षणम् मनआह्लादयां चकारे 'ति भावः । त्रिलिङ्गस् तु विभीतकः । अक्षस् तुषः कर्षफलो भूतावासः कलिद्रुमः । व्यधिते 'ति धाञो लुङि स्थाघ्वोरिच्चेतीत्वेह्रस्वादितिसिज्लोपद्रूपम् । अत्रे 'यम् पुराणवार्ता । ऋतुपर्णो विभीतकवृक्षं दृष्ट्वा बाहुकम्

बलजितदेवार्याभ्यां विद्यानिमयो ऽथ युगपद् एवा 'र्याभ्याम् ।
सम्मर्दे ऽवार्याभ्यां व्यधायि संस्पृश्य सम्पदे वार्य् आभ्याम् ॥२१॥
तदनु द्रुतम् अक्षम् अतः स्वीकृत्या 'स्वदहने ऽधिकतमक्षमतः ।
कलिर् उन्नतम् अक्षम् अतः स्फुटम् एव गतो नलस् तु न तम् अक्षमत ॥२२॥
पतितम् अलसम् एतस्या भैम्या हृपि विद्धि मा 'नलसमे तस्याः ।

उवाच । ममा 'त्र गणनाकौशलम् पश्य अस्मिन् वृक्षे पतितम् पत्रम् एका-
धिकशतम् फलं च तावद् एव पतितं स्थितानि पत्राणि पञ्चकोट्यः फलानि
द्वे सहस्रे । बाहुक उवाच । वार्ष्णेय रश्मीन् संयच्छ अहं राजगणितं गणयि-
ष्यामि ततो नलस् तद् गणयित्वा आह अत्यद्भुतम् इदम् इमां विद्याम् मह्यं
देहि मत्तो ऽश्वहृदयविद्यां गृहाण इति परिवर्तितम् । तद् आह ॥२०॥
बले 'ति । अथ रथवेगफलगणनकौतुकदर्शनानन्तरम् बलजितदेवार्याभ्याम् बलेन
सामर्थ्येन जितः पराजितो देवार्यः देवस्वामी 'न्द्रो याभ्यां तादृग्भ्याम् आभ्यां
नलर्तुपर्णाभ्यां सम्मर्दे रणे ऽवार्याभ्यां निवारयितुम् अशक्याभ्यां युगपद् एव
एकवारम् एव वारि जलं संस्पृश्य सम्पदे श्रिये विद्याविनिमयो विद्यापरिवर्तनं
व्यधायि विहितः । अथ नलर्तुपर्णौ रथाद् अवतीर्य आचम्य विद्याग्रहणम्
परस्परं चक्रतुर् इति भावः । व्यधायी 'ति धाञो लुङि चिणि आतो युक्-
चिण्कृतोर् इति युकि सति रूपम् ॥२१॥
तद् इति । तदनु ततः पश्चात् स्फुटम् प्रव्यक्तम् अस्वदहने कलिदहने ऽधिक-
तमक्षमतः अत्यन्तसमर्थात् । अतो ऽस्मात् नलसकाशात् कलिर् द्रुतम् एव
उन्नतम् उच्चैस्तरम् अक्षं विभीतकवृक्षं श्रितः प्राप्तः । तु पुनः नलः अतः
ऋतुपर्णाद् अक्षं स्वीकृत्य अक्षज्ञानम् प्राप्य तं कलिं न अक्षमत न विषेहे ।
ऋतुपर्णाद् अक्षहृदयम् प्राप्य कलिं यावद् भस्मसात् करोति तावन् नलाद्
विनिर्गत्य विभीतकतरुम् आशिश्रियत् नलस् तु तस्मै चुकोपे 'ति भावः ।
पश्चात्सादृश्ययोर् अनु । लघु क्षिप्रम् अरं द्रुतम् । अक्षमते 'ति क्षमूष् सहने
ऽस्माल् लङि ॥२२॥
पतितम् इति । कलिर् नलम् आह । हे नल एतस्यास् तव हृदये विद्यमानायास्
तस्या भैम्या अनलसमे ऽग्निसदृशे हृपि रोषे पतितम् अत एवा 'लसं दुःखितम्

आर्तिबलसमेतस्या ऽऽश्रितस्य शरणप्रदो नल स मे ऽतः स्याः ॥२३॥
कलिम् इति नानामायं नमन्तम् अमुचन् महामना नाम यम् ।
कीर्तिधनानाम् आयं स दधाति हरन्ति रिपुजननामा यम् ॥२४॥
अथ नुन्नाश्वस् तेन प्रास्थित राज्ञा महात्मना ऽऽश्वस्तेन ।
सा ललना श्वस् ते न स्याद् इति हसता विरोधिना ऽऽशु अस्तेन ॥२५॥

मां विद्धि जानीहि । आर्त्यनलसमेतस्य आ समन्ताद् या अर्तिः पीडा सै ऽवा ऽनलस् तत्समेतस्य संयुक्तस्य आर्तिबलसमेतस्ये ऽति पाठे आर्तेः पीडाया बलेन आधिक्येन समेतस्ये ऽत्य् अर्थः । मे मम आश्रितस्य आश्रयवतः । अतः दमयन्तीक्रोधात् शरणप्रदः प्राणत्राणदाता स त्वं स्याः भवेः आः पीडायां दमयन्तीरोषाग्निना दह्यमानम् माम् प्रति किं रोषं करोषि । भैमीकोपज्वलितस्य मे शरणम् भवे ऽति भावः । आस् तु स्यात् कोपपीडयोः । अर्तिः पीडा धनुःकोट्योः ॥२३॥

कली ऽति । इत्य् अनेन प्रकारेण नमन्तं प्रणमन्तं नानामायं नानाव्याजं कलिम् महामना महाशयो ऽयं नलो ऽमुञ्चत् त्यक्तवान् । नाम सम्भावनायाम् । यम् पुरुषं रिपुजननामाः शत्रुजननमस्काराः हरन्ति आकर्षन्ति । स पुमान् कीर्तिधनानां यशोलक्षणद्रविणानाम् आयं दधाति धारयति । एवम् बहुधा नमस्कुर्वन्तं कलिं कारुणिकतया ऽत्यजत् । यतः शत्रुनतयो यं वासयन्ति स यशोधनवान् भवती ऽति । मुच्ल मोक्षणे इत्य् एतस्य लङि अमुञ्चद् इति । नाम प्रकाश्यसम्भाव्यक्रोधोपगमकुत्सने । अत्रे ऽयम् भारतवार्ता । अक्षहृदयं गृहीतवतो नलस्य देहात् कर्कोटकनागविषं वमन् कलिर् निःसृतः तं कलिं नलः शप्तुम् उद्यतः ततो ऽतिभीतः कलिर् नलम् उवाच त्वम् मे शरणम् भव मा शपस्व ये जनास् त्वां कीर्तयिष्यन्ति तेषाम् मत्तो न भयम् भवेत् अहम् अमुं विभीतकवृक्षम् प्रविशामि ततः कारुण्यान् नलस् तम् अक्षमत ततो विभीतकवृक्षं स प्रविवेश ततः प्रभृति विभीतकवृक्षच्छाया ऽपि न गृह्यते इति ॥२४॥

अथे ऽति । अथ कलिगमनान्तरं विरोधिना कलिना शत्रुणा आशु शीघ्रम् अस्तेन त्यक्तेन । आश्वस्तेन विश्रान्तवता दुःखाद् वा आश्वस्तेन आश्वासम् प्राप्तवता महात्मना महाप्रभावेन । सा ललना भैमी श्व आगामिदिने ते तव किं न स्याद्

सो ऽयम् अनेना यतताम् इष्ट इति नलः समं तु अनेना ”यत ताम् ।
वहति दिने ऽनायततताम् पुरीम् प्रियेणा ”श्रितां जनेना ”यतताम् ॥२६॥
कर्तुम् मानं ते न श्रम इति नीतो भुवो ऽयम् आनन्ते ’नः ।
स्वं धामा ’नन्तेन प्रेम्णा भीमेन जितविमानं तेन ॥२७॥

अपि तु स्याद् एवे ’ति व्याजेन सा तव स्त्री न स्यान् न भविष्यती ’ति मनसि कृत्य हसता तेन नलेन नुन्नाश्वः प्रेरितहयः स राजा ऋतुपर्णः प्रास्थित प्रचचाले ’ति यावत् । विद्योपदेशस्थानात् शेषमार्गम् अवगाहते ’ति भावः । नुन्ननुन्नास्तनिष्ठ्यूता विद्धक्षिप्रेरिताः समाः । समवप्रविभ्यः स्थ इत्य् आत्मनेपदे स्थाघ्वोर् इच्चेतीत्वेसिचोलोपे लङि रूपम् प्रास्थिते ’ति । उपसर्गेण धात्वर्थो बलाद् अन्यत्र नीयत इति स्थित्यर्थस्य प्रपूर्वत्वे तद्विरुद्धार्थत्वम् । श्वो गते ऽनागते ऽह्नि श्व इत्य् अमरः ॥२५॥

सो ऽयम् अनेने ’ति । अयं कलिमुक्तो अनेना निष्पापो नलः यततां यतीनाम् इष्टः वल्लभ । यद्वा इष्टे ऽभीप्सिते दमयन्तीदर्शने यततां यत्नं कोरात् इति हेतोर् दिने दिवसे ऽनायततताम् अदीर्घतां वहति सति धारयति सति स नलो ऽनेन ऋतुपर्णेन समं सह आयततां धनागमव्याप्ताम् प्रियेण जनेन दमयन्त्या ”श्रिता ताम् पुरीं कुण्डिनाख्याम् आयत आगच्छत् आगतः गतवान् । कलिमुक्तो नलो भैमीम् पश्यत्व् इतो ’व सकरुणे दिने ऽस्तं गच्छति सति ऋतुपर्णेन सह नलः कुण्डिनपुरम् प्रविवेशे ’ति भावः । आयते ’त्य् अय गताव् इत्य् अस्य लङि । दैर्घ्यम् आयामः । वह प्रापण इत्य् अस्य शतरि रूपं वहतो ’ति ॥२६॥

कर्तुम् इति । तेन भीमभूपेन ते तव श्रमो मार्गोद्भवपरिश्रमो ना ’भूद् इत्य् उक्त्वा स्वागतम् आभाष्य आनन्ता कृतनतिर् दर्शितनम्रत्वो ऽयम् भुवः भूमेर् इनः प्रभुर् ऋतुपर्णो मानम् पूजां सम्मानं वा कर्तुं विधातुं जितविमानं जितानि विमानानि व्योमयानानि येन तादृशं स्वं स्वकीयं धाम गृहम् । अनन्तेन बहुतरेण प्रेम्णा स्नेहेन नीतः प्रापितः । तदनन्तरं कृतानतिः ऋतुपर्णस् तेन भीमेन विमानसुन्दरं स्वसौधम् पूजयितुम् आनिन्य इति भावः । इनः सूर्ये प्रभौ । प्रेम स्नेहः । व्योमयानं विमानो ऽस्त्री ’त्य् अमरः । धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोर् इति हेमः । यद्वा । तेन भीमेन अयम् ऋतुपर्णः अर्थाद् अस्य श्रमो मार्गोद्भवः श्रम इति हेतोः स्वधाम नीतः कथम्भूतेन

सज्जनतामहितस्य व्यग्रेतरलोकसूचितामहितस्य ।
स द्विषताम् अहितस्य द्रुतम् पुरस्ये ’क्षणात् तताम हि तस्य ॥२८॥
प्रथिततमाया मायां शुचिर् अथ वसताव् अनुत्तमायामायाम् ।
चारुतमाया मा ’यान् नलः स्मरन् वासम् असुसमाया मायाम् ॥२९॥

मानन्तेन मायाः लक्ष्म्याः अन्तं विनाशाभावो यस्य तेन स्थिरलक्ष्मीकेणे ’ति यावद् इत्य् अर्थः ॥२७॥

सज्जनते ’ति । स ऋतुपर्णः सज्जनतामहितस्य साधुत्वेन पूजितस्य । यद्वा जनानां समूहो जनता सती चा ’सौ जनता चे ’ति सज्जनता तया महितस्य पूजितस्ये ’त्य् अर्थः । द्विषतां शत्रूणाम् अहितस्या ’निष्टस्य तस्य भीमस्य व्यग्रेतरलोकसूचितामहितस्य । व्यग्रेतर अव्यग्रा ये लोकास् तैः सूचिता प्रकाशिता आ समन्तात् महिता उत्सवन्ता यस्य तादृशस्य पुरस्य कुण्डिनस्ये ’क्षणाद् आलोकनाद् द्रुतं शीघ्रं तताम ग्लानिं जगाम हि निश्चये । भीमपुरसमृद्धिदर्शनात् तमितो ऽभूद् इति भावः । मह उद्धव उत्सवः । तमु ग्लानाव् इत्य् अस्य लिटि ततामे ’ति । यद्वा । स नलः ततान ग्लानिम् प्राप स्वदैन्यस्मरणाद् इति भावः । हितस्य इष्टस्य श्वशुरस्य पुरस्य दर्शनाद् इत्य् अर्थः ॥२८॥

प्रथिते ’ति । अथा ’नन्तरं शुचिः पवित्रः कर्कोटकवस्त्रपरिधानान् नलः मायां लक्ष्म्यां शरीरशोभायां वा प्रथिततमायाः प्रसिद्धतमायाः असुसमायाः प्राणसमायाः दमयन्त्याः मायां व्याजं स्वयंवरम् ऋतुपर्णाह्वानस्वागमनप्रयोजिकां स्मरन् विचारयन् । अनुत्तमायामायाम् अनुत्तमः श्रेष्ठ आयामो दैर्घ्यं यस्यास् तादृश्यां चारुतमायाम् अतिशयरुचिरायां वसतौ गृहे वासम् आयात् प्राप । नलो भीमोद्दिष्टर्तुपर्णनिवासं दमयन्त्या व्याजं स्मरन् उत्तमां वसतिं गतवान् इति भावः । प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः । वसती रात्रिवेश्मनोः । सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् । दैर्घ्यम् आयामः । आयाद् इति यातेर् लङि । यद्वा । नलः चारुतमाया अत्यन्तसुन्दर्याः दमयन्त्याः वसतौ गृहे वासम् मा आयात् न प्राप किं तु रथोपरि तस्थौ । अत्रे ’यम् पुराणवार्ता । नलस् तावद् भीमगृहं न ययौ किं तु रथोपरि तस्थौ तच् छ्रुत्वा दमयन्ती प्रासादम् आरुह्य नलं समीक्ष्य अतिहृष्टा बभूव इति तद् एवा ’ह ॥२९॥

तं स्वनयानन्तरसान्निध्यगतम् अवेत्य नुन्नयानं तरसा ।
अभ्युदयान् अन्तर् असाव् अधित मुदा नैषधप्रिया नन्तरसा ॥३०॥
तन्नुन्ना ऽऽली केन स्थीयत इत्य् अत्र सुमुखनालीकेन ।
किं हीनालीकेन स्वकमित्रा कृत्तरिपुजनालीकेन ॥३१॥
तं साम्ना ऽऽमा नयतः परीक्ष्य बहुधा गुणाभिरामा न यतः ।

तम् इति । स्वनयानन्तरसान्निध्यगतं स्वस्या ऽऽत्मनो नयो नीतिः स्वयंवरघोषणास्य ऋतुपर्णश्रावणं तदनन्तरं तदुत्तरकालाविलम्बनेन सान्निध्यं समीप गतम् प्राप्तं तरसा वेगेन नुन्नयानम् प्रेरितहयं तं नलम् अवेत्य ज्ञात्वा अनन्तरसा अनन्तो बहुलो रसः शृङ्गारः स्तम्भो ऽनुरागो यस्यास् तादृश्य् असौ दमयन्ती नैषधप्रिया नैषधो नलस् तस्य प्रिया अन्तर् मनसि अभ्युदयान् श्रेयांसि सुखानि वा मुदा हर्षेण अधित धृतवती । स्वनीत्युत्तरकालम् आगतं नलम् बुध्वा दमयन्ती बहुलम् आनन्दम् अवापे ऽति भावः । शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः । अधिते ऽति धाञो लुङि सिचि ॥३०॥

तन्नुने ऽति । कृत्तरिपुजनालीकेन कृत्तानि छिन्नानि रिपुजनानां शत्रुजनानाम् आली पङ्क्तिास् तस्याः कानि शिरांसि येन तथा सुमुखनालीकेन शोभनमुखपद्मेन हीनालीकेन हीनं त्यक्तम् अलीकम् पापं येन तेन तथा स्वकमित्रा स्वकामुकेन नलेन किम् अत्र गृहे ऋतुपर्णावाससौधे केन सुखेन स्थीयत इति हेतोस् तन्नुन्ना दमयन्त्या प्रेरिता सा ऽऽली केशिनी स्ववयस्यावसतिं स्वसखी दमयन्ती तस्या निवासवेश्मा ऽनयते ऽत्य् उत्तरश्लोकस्थेन सम्बन्धः । ऋतुपर्णावासगृहे कथं नलस् तिष्ठती ऽति ज्ञातुम् प्रेषिता सखी तम् भैमीगृहम् अनयद् इति भावः । छिन्नं छातं लूनं कृत्तं दातं दितं छितं वृक्णं । आली सखी वयस्या च । कं शिरोऽम्बुनोः । स्थीयत इति घु मा स्था गा पा जहाति सांहलीतीत्वम् । नालीकं शरपद्मयोः । अलीकं त्व् अप्रिये ऽनृते ॥३१॥

तम् इति । भैमीप्रेरिता केशिनी तं नलं साम्ना ऽऽमा सान्त्वेन सहितं नयतः नीतितः बहुधा नानाप्रकारेण परीक्ष्य नल एवा ऽयम् इति ज्ञात्वा स्ववयस्याया भैम्याः वसतिम् भवनम् अपि पराम् उत्कृष्टां स्वजनगिरा दमयन्तीस्वजनानां गिरा वाक्येना ऽऽनयता ऽऽनीतवती । तं कम् । यतः यस्मात् नलात् मानयतः

स्वजनगिरा मानयतः स्ववयस्यावसतिम् अपि पराम् आनयत ॥३२॥

लक्ष्मीः प्रापयतः अर्जयतः अन्ये के ऽपि गुणाभिरामा गुणरमणीया न भवन्ति। यद्वा कीदृशो नलः । मानयतः मानेन यतः नियतः मानी 'त्य् अर्थः । पुरुषश्रेष्ठं नलं निश्चित्य भैमीप्रेषिता तद्भवनं निनाये 'ति भावः । बन्धुस्वस्वजनाः समाः । आनयते 'ति नीञो लङि । अत्र परीक्षायाः पुराणवार्ता । भैमी केशिनीम् उवाच । गच्छ रथान्तिके बाहुकनामा क एष अत्र मम नानाशङ्का भवति तत्र गत्वा पर्णादवाक्यं श्रावय सा गत्वा बाहुकम् उवाच । त्वां दमयन्ती पृच्छति यूयं किमर्थम् आगताः । बाहुक उवाच । तस्याः स्वयंवरं श्रुत्वा अयोध्यातो एकाह्ना ''गताः । पुनः केशिन्य् उवाच कस् त्वम् । बाहुक उवाच । असौ वार्ष्णेयनामा नलसूत आसीत् नले राज्याद् भ्रष्टे ऋतुपर्णम् आश्रितः अहम् अप्य् अस्य सूतः । केशिन्य् उवाच । वार्ष्णेयो नलवृत्तान्तवित् त्वं वा । बाहुक उवाच । नलं न को ऽपि जानाति । ततः केशिन्या पर्णादानीतश्लोकपञ्चकं श्रावितं तच् छ्रुत्वा तूष्णीमास एतत् सर्वम् भैम्यै सा कथयामास भैमी पुनः ताम् उवाच पुनर् याहि पाकार्थं जलाग्निं विना सामग्रीं देहि केशिनी तथा कृत्वा नलदत्तश्लोकम् एकं गृहीत्वा गता । श्लोको यथा

मम राज्यम् प्रणष्टं यत् तन् ना 'हं कृतवान् स्वयम् ।
कलिने 'तत् कृतम् भीरु यच् च त्वाम् अहम् अत्यजम् ॥

स कलिर् रुदतीं मां विमुच्य गतः तच् छ्रुत्वा भैमी सन्दिग्धा उवाच । पुनर् गत्वा तच्चेष्टाम् अनुभव । सा तथा कृत्वा ''गत्यो 'वाच । ईदृक् पुरुषो न द्वा 'पि दृष्टो न श्रुतः यत्स्पर्शे स्वल्पं द्रव्यम् प्रचुरम् भवति कदा 'पि शिरो न नमति । उच्चरम् अप्य् अस्य सुकरम् भवति अपरं च तव पित्रा मांसम् प्रेरितं तस्य प्रक्षालनार्थं शून्यकुम्भः प्रेरितः स कुम्भस् तत्स्पर्शात् वारिपूर्णो बभूव तेन गृहीते तृणे अग्निर् जज्वाल अग्निः स्पृष्टो न दहति तत्करम् अर्दितम् अपि पुष्पं न म्लायति ततः केशिनी इन्द्रसेनं तत्पुत्रम् इन्द्रसेनां च कन्यां नीत्वा ययौ । बाहुकस् तौ दृष्ट्वा क्रोडे कृत्वा रोद क्षणात् तौ त्यक्त्वा ममा 'पि सुताव् ईदृशौ इति जुगोप सः बाहुकेन पक्वं व्यञ्जनं केशिनीद्वारा आनीया ''स्वाद्य नलो ऽयम् इति निश्चयम् अकरोत् ततः केशिनीम् पुनः प्रस्थाप्य नानास्तुतिं कारयित्वा गृहम् आनयामासे 'ति ॥३२॥

तरसे 'वा 'साव् आस स्वां विकृतिम् अहेर् वहन् सुवासा वासः ।
स्थिरभावा सा वा 'स स्निग्धम् चा 'रंस्त नृपतिवासावासः ॥३३॥
नृपधामनि शान्तेन व्यतीत्य भैमीसमागमनिशां तेन ।
द्विषताम् अनिशान्तेन श्वशुरो दृष्टः श्रितोत्तमनिशान्तेन ॥३४॥
धृतजडिमा ने 'का 'सीद् ऋतुपर्णो ऽपि प्रदृश्यमाने ह्यासी ।
आत्मसमाने ऽह्यासीद् अभिपूज्यै 'नं नलो ऽरिमानेहासी ॥३५॥

तरसे 'वे 'ति । सुवासाः शोभनं वासो वस्त्रं यस्य तादृग् असौ नलः अहेः कर्कोटकस्य वासो वस्त्रं वहन् परिदधन् स्वां विकृतिं विकारं कुब्जत्ववैरूप्यादिलक्षणां तरसे 'व झटित्य् एव आस अक्षैप्सीत् । सा दमयन्ती वा स्थिरभावा निश्चलस्वाभिप्राया आस शुशुभे । नृपतिवासे भीमगृहे अवासो निवासो यस्य तादृक् भीमभूपसौधगतः स्निग्धः स्नेहवान् अरंस्त रेमे दमयन्त्या सहे 'ति शेषः । वस्त्रम् आच्छादनं वासः । आसे 'ति असु क्षेपण इत्य् अस्य लिटि रूपम् । द्वितीयम् अस गतिदीप्त्यादानेषु इत्य् अस्य रूपम् । अरंस्ते 'ति रमे लङि ॥३३॥

नृपे 'ति । नृपधामनि नृपस्य भीमस्य धामनि गृहे । शान्तेन क्षमायुक्तेन श्रितोत्तमनिशान्तेन श्रितम् उत्तमं निशान्तं गृहं येन तादृशेन । द्विषतां शत्रूणाम् अनिशम् अन्तो नाशो यस्मात् तादृशेन तेन नलेन । भैमीसमागमनिशाम् भैमी दमयन्ती तस्याः समागमो यत्र तां निशां रात्रिं व्यतीत्य व्युत्क्रम्य श्वशुरो भीमो दृष्टः । भीमगृहे दमयन्तीसमागमरात्रिं व्यतीत्य प्रातर् भीमम् अद्राक्षीद् इति भावः । निशान्तवस्त्यसदनम् भवनागारमन्दिरम् इत्य् अमरः । धाम रश्मौ गृहे देहे इति हेमचन्द्रः ॥३४॥

धृते 'ति । ना पुरुषः ऋतुपर्णो ऽस्मिन् आत्मसमाने नले आत्मसदृशे प्रदृश्यमाने ज्ञायमाने सति इह भीमसदसि धृतजडिमा धृतजडभाव आसीत् । यद्वा । धृतजडिमा न आसीत् अपि तु जडो ऽभूद् इत्य् अर्थः काक्वार्थे नञ् अरिमाने ह्यासी अरीणां शत्रूणाम् माने हसितुं शीलम् अस्ये 'ति तादृक् । यद्वा । अरिमानेहासी पान्तकर्मणि धातोः प्रयोगः अरिमानस्य शत्र्वभिमानस्य ईहा चेष्टा तस्या नाशक इत्य् अर्थः । हासी हासयुतो नल एनम् ऋतुपर्णम् अभिपूज्य धनमानादिना

सासुसमासामा स स्वयम् अत्र पुरे नलो ऽयम् आसामास ।
स्त्रीणाम् आसाम् आस श्रमम् अमुना ऽनायि सुमुखमासा मासः ॥३६॥
अथ महद् आराजितया स्वपुरं चम्वा नलस् तदा राजितया ।
सासिगदाराजितया ऽरं पुष्करं चा ऽभ्यधाद् उदाराजितया ॥३७॥

सन्तोष्या ऽहासीद् व्यसर्जयत् । प्रातः स्वसमाने नले दृश्यमाने ऋतुपर्णो जड इवा ऽभूत् हास्ययुक्ताम् च नलः ऋतुपर्णं सम्पूज्य व्यसर्जयत । पच्यादिभ्य इमनिङ्श्वेतीमनिच् । आसीद् इत्य् अस्तेर् लङि । आहासीद् इति हाकेर् लङि । यद्वा ऋतुपर्णः कथम्भूतः अहासो हास्यरहितः अथवा हा इति कृत्वा आसो आसः आक्षेपस् तद्युक्तः हा त्वयि ममा ऽपराधो जात इत्य् आक्षेपयुक्त इत्य् अर्थः ॥३५॥

से ऽति । स अयं नलः अत्र पुरे भीमपुरे स्वयम् आसामास तस्थौ स्वयम् इत्य् अत्र स्वैरम् इति पाठे स्वैरं स्वच्छन्दम् आसामास इत्य् अर्थः कथम्भूतः सासुसमासामा असुना प्राणेन समा असुसमा दमयन्ती तस्याः साम सान्त्वं तेन सहितो दमयन्तीकृतसान्त्वः । आसां स्त्रीणां स्वावरोधवधूनां श्रमम् आस चिक्षेप चिरविरहजं दुःखम् अपनुनोद । कीदृशेन । मुखतुलितमासा मुखेन तुलितः समीकृतो माश् चन्द्रो येन तादृशेन । अमुना नलेन मासो ऽनायि निन्ये । स नलो विरहपीडितस्य स्त्रीगणस्य क्लेशम् अपाकार्षीत् । एवं मासो व्यचक्रामे ऽति भावः । मास् तु मासे निशाकरे इति हेमः । आसे ऽति असु क्षेपण इत्य् अस्य लिटि । आगादितीणोलुङि । अत्रे ऽयम् पुराणवार्ता । स ऋतुपर्णश् तच् छ्रुत्वा नलं ज्ञात्वा सापराधः सन् नलम् उवाच मत् कृतम् अपराधं क्षमस्व दिष्ट्या भार्यया सङ्गतो ऽसि । नल उवाच ना ऽपराधस् ते कलिकृतम् एवै ऽतत् । अश्वहृदयविद्यां गृहाण स ततस् तां गृहीत्वा अन्येन सारथिना अयोध्यां ययौ नलस् तत्र मासम् एकं स्थित्वा स्वपुरं गत्वा पुष्करम् उवाच इति तद् एवा ऽह ॥३६॥

अथे ऽति । अथा ऽनन्तरं तदा नल आराजितया अरीणां समूह आरं तेन अजितया अपराजितया सासिगदाराजितया असिसहिता गदाः असिगदास् तासां राजिः पङ्क्तिस् तया सहिता सासिगदाराजिस् तत्वेन राजितया शोभितया खड्गगदाराजियुक्तात्वेन शोभितया चम्वा सेनया महत् पुरं स्वनगरम् आर गतवान् ।

मयि गहना माया ’’सि त्वया मनो ना ’त्र मानिनाम् आयासि ।
धनुरवनामाया ’सि द्यूताया ’लं क्व चेतनाम् आयासि ॥३८॥
इत्य् उक्तो देवनतः सो ऽर्थ्य् अभवत् पुष्करः प्रमादे ऽवनतः ।
येन स विभिदे ऽवनतः पुरा ’वनेः श्रमम् अपि प्रपेदे वनतः ॥३९॥

उदाराजितया उदारा महती या आजिः सङ्ग्रामस् तस्य भावस् तत्त्वं तेन पुष्करम् अभ्यधात् । अभिगतः । स नलस् तदनन्तरम् महत्या सेनया पुष्करेण सङ्ग्रामं कर्तुं जगामे ’ति भावः । आरम् इति तस्य समूह इत्य् अणि-मस्येतिचेतीलोपे रूपम् । पृतना ’नीकिनी चमूः । आरे ’ति ऋ गताव् इत्य् अस्य लिटि । वीथ्य् आलिर् आवलिः पङ्क्तिः श्रेणी लेखास् तु राजयः । उदारो दातृमहतोः । स्त्रियः संयत्समित्याजिसमिद्युधः ॥३७॥

मयी ’ति । नलः पुष्करम् आह । हे पुष्कर त्वया मयि गहना निविडा माया व्याजः आसि क्षिप्ता । क्वचित् तु मयि नानामाया ’’सि इति पाठस् तत्र नाना विविधा माया आसि क्षिप्ते ’त्य् अर्थः । त्वया ’त्रा ’स्मिन् विषये मानिनाम् मनो हृदयम् आयासि आयासयुक्तं दुःखितं कृतं न अपि तु दुःखीकृतम् । नञ् काक्वर्थः । धनुरवनामाय धनुरारोपणाय युद्धाय द्यूताय वा अलम् असि समर्थो ऽसि । क्व वा कस्मिन् विषये चेतनाम् बुद्धिम् आयासि आगच्छसि धनुरारोपणं वा द्यूतं वा त्वम् एकं कुरु येन ते मनोऽभिलाषः तद्वद इत्य् अर्थः । असु क्षेपण इत्य् अस्य चिणि लुङि आसी ’ति । यसु ’पतापे ऽस्या ’’यासी ’ति । अस्तेर् असी ’ति । यातेर् आयासी ’ति । अलम् भूषणपर्याप्ति-शक्तिवारणवाचकम् । द्यूतो ऽस्त्रियाम् अक्षवती कैतवम् पण इत्य् अपि । यद्वा हे नानामाय त्वया मानिना मनः मम चित्तम् आसि क्षिप्तम् मायया मम मनो भ्रामितम् इत्य् अर्थः । अतो मा यासि मा पलायस्व आहूतो न निवर्तेत द्यूताद् अपि रणाद् अपी ’ति स्मृतेर् इति भावः ॥३८॥

इती ’ति । इत्य् अनेन प्रकारेण नलेनो ’क्तो गदिते प्रमादे अनवधानतायाम् अवनतः आनतः । यद्वा अवनतः रतः सर्वं द्यूतेनै ’व भविष्यती ’ति मन्यमानः स पुष्करः देवनतो द्यूतेन पञ्चम्यास् तसिल् अर्थी प्रयोजनवान् धनेच्छुर् वा ’भवत् । येन पुष्करेण स नलः पुरा पूर्वम् अवनेः भूमेर् अवनतो रक्षणाद् विभिदे भिन्नः कृतः । वनतो ऽरण्यात् श्रमम् अपि प्रपेदे प्राप्तवान् । स

स च राज्ञा यततेन द्यूते ऽसुपणो जितो व्यजायत तेन ।
निर्व्याजायततेन त्यक्तासू चा ऽगःसु गतरजा यतति न ॥४०॥
अयि भवने त्रायस्व स्वभुवम् पुष्कर मुदं जने ऽत्रा ऽयस्व ।
युगबलनेत्राय स्वस्नेहाय पुरे ऽव विमलनेत्राय स्वः ॥४१॥

पुष्करो द्यूताध्यक्ष एवा ऽभूत् । येन पुष्करेण नलो भूरक्षणात् पृथक् कृतो ऽरण्ये दुःखं च लब्धवान् । देवनाः पाशकाश् च ते । प्रमादो ऽनवधानता । अवाग्रे ऽवनतानतम् । पद गताव् इत्य् अस्य लिटि प्रपेदे इति ॥३९॥

स चे ऽति । स च पुष्करो निर्व्याजायततेन निर्व्याजो निष्कपट आयो धनागमस् तेन ततेन व्याप्तेन निर्व्याजधनागमव्याप्तेन अयततेन शुभावहविधिव्यप्तेन तेन राज्ञा नलेन असुपणे असवः प्राणा एव पणो ग्लहो यस्मिंस् तादृशे द्यूते जितः पराजितो व्यजायता ऽजनिष्ट । त्यक्तासू चो ऽत्सृष्टासू च । कुत इत्य् अत आह गतरजाः गतं रजो गुणो मत्सरो यस्य तादृक् पुरुषः । आगःसु अपराधेषु पापेषु वा न यतते न यत्नं करोति । प्राणपणे द्यूते नलेन पुष्करः पराजितः उज्झितासू चे ऽति भावः । पणो ऽक्षेषु ग्लहः । जनी प्रादुर्भावे ज्ञाजनोर् जे ऽति जादेशः अजायते ऽति । रजोगुणे स्त्री पुष्पे ऽपि । पापापराधयोर् आगः । यती प्रयत्ने लटि यतते इति । अत्रे ऽयम् पुराणवार्ता । नलो गत्वा पुष्करम् उवाच राज्यं त्यज नो चेद् युद्धं द्यूतं वा कुरु इत्य् उक्तः द्यूतम् अकरोत् तेन पराजितः प्राणात्यये पादा नतः प्राणप्रार्थको ऽभवत् ततो निष्कपटं ज्ञात्वा तेन सह सौहार्दम् अकरोद् इति ॥४०॥

अयी ऽति । नलः पुष्करम् आह । अयि कोमलामन्त्रणे हे पुष्कर भवने गृहे निवसन् स्वभुवं स्वभूमिम् अस्मद्दत्तं त्रायस्व रक्षस्व अत्र जने जनपदलोके मुदं हर्षम् आयस्व प्राप्नुहि युगबलनेत्राय युगस्य युग्मस्य बलं सामर्थ्यं नेत्रं नायकं यस्य तादृशाय विमलनेत्राय निर्मललोचनाय स्वस्नेहाय स्वप्रेम्णे पुरे ऽव पूर्वम् इव स्वः भवावः । हे पुष्कर त्वं स्वभूमिं रक्ष लोके स्निग्धो भव मम तव च स्नेहः पुरे ऽव वर्धताम् इत्य् आहे ऽति भावः । त्रैङ् पालन इत्य् अस्य लोटि त्रायस्व । आयस्वे ऽति अय गताव् इत्य् अस्य । स्वः अस्तेर् लटि । यद्वा युगबलनेत्रा आवयोः सेनापतिभ्यां सह स्वभवने अयस्व गच्छस्व

हरिपवनयमान् अस्य स्वबलाद् इति तुलयतो ऽनुनयमानस्य ।
स्नेहान् अयमानस्य प्रणातिम् अधात् पुष्करः सुनयमानस्य ॥४२॥
अरिसेनानाशस्या ऽश्रितवत्सल ते ऽस्तु चेतना ना ऽशस्या ।
पूरितनानाशस्या ऽस्तोकयशोभिः कदा ऽपि ना ऽनाशः स्याः ॥४३॥
इति स ननाम नलस्य प्रणतो ऽङ्घ्री फुल्लवक्त्रनामनलस्य ।

आवाम् पुरे ऽव स्नेहाय स्वः भवावः कथम्भूताय विमलनेत्राय विमलानि नेत्राणि यस्मिंस् तस्मै अन्यत् पूर्ववद् इत्य् अर्थः ॥४१॥

हरी ऽति । हरिपवनयमान् हरिर् इन्द्रः पवमानो वायुः यमो धर्मराट् तान् स्वबलात् स्वसामर्थ्यात् तुलयतः समीकुर्वतः अनुनयमानस्या ऽनुमानयतः स्नेहान् प्रीतीः अयमानस्य गच्छतः सुनयमानस्य शोभननीत्यभिमानस्या ऽस्य नलस्य पुष्करः प्रणातिम् प्रह्वत्वं नमस्कारं वा इत्य् अनेन प्रकारेण अधाद् अकार्षीत् । एवम् बहुधा स्नेहं दर्शयतो ऽतिवत्सलस्य पुष्करः प्रह्वो ऽभवद् इति भावः । अधाद् इति धातेर् लङि ॥४२॥

अरी ऽति । पुष्करो नलम् आह । हे आश्रितवत्सल आश्रितेषु वत्सल कारुणिक अस्तोकयशोभिः अनल्पयशोभिः पूरितनानाशस्य पूरिता नाना आशा दिशो येन तादृशस्य अरिसेनानाशस्य अरिसेनायाः नाशो ऽवसानं यस्मात् तादृशस्य शत्रुबलातङ्कस्य ते तव अशस्या न शस्या ऽप्रशस्यां स्तोतुम् अयोग्या चेतना बुद्धिर् न अस्तु न भवतु । कदा ऽपि कस्मिन्न् अपि काले अनाशः आशारहितो न स्याः न भवेः । हे आश्रितकृपापात्र तवा ऽस्तव्या धीर् मा भूत् । कदा ऽप्य् आशाव्याघातस् तव मा स्याद् इत्य् अर्थः । आशा तृष्णा ऽपि याचना । स्तोकाल्पक्षुल्लकाः । अस्तु अस्तेर् लोटि । स्निग्धस् तु वत्सलः ॥४३॥

इती ऽति । इत्य् अनेन प्रकारेण प्रणतो नम्रः स पुष्करः नलस्या ऽङ्घ्री चरणौ ननाम प्रणतवान् । नाम सम्भावनायाम् । कीदृशस्य नलस्य । फुल्लवक्त्रनामनलस्य फुल्लं विकसितं हर्षस्मेरं वक्त्रनाम वक्त्रनामकं रूपं वा नलं कमलं यस्य विकसितमुखपद्मस्य । कीदृशस्य । नामनलस्य नमनं नामस् तस्मिन् नलस्य तृणस्य नतो तृणप्रायस्य । यद्वा । नामनं नमस्कारं लाति स्वीकरोति नामनलः तस्य ला आदाने डप्रत्यये रूपम् इत्य् अर्थः । एवम् अहिता-

अह्नितानाम् अनलस्य प्रययौ सार्धम् बलेन नाम नलस्य ॥४४॥
मुदम् अमुना ऽऽमुक्तेन प्राप सुराज्यम् महात्मनाम् उक्तेन ।
धृतनानामुक्तेन प्राशासि चिरं विघट्टनामुक्तेन ॥४५॥
अरिसंहतिर् अस्य वनेषु शुचाम् पदम् आपदम् आपद् अमा ऽपद्मा ।

नाम् अनलस्य शत्रूणाम् अग्नेः । तेन नलेन सार्धम् सह प्रययौ गतवान् नलानुवर्ती बभूव । एवं विकासितवदनकमलस्य चरणौ ननाम नलेन सह गतवांश् चे ऽति भावः । नलम् पद्मं नलम् तृणे । नाम प्रकाशसम्भाव्यक्रोधोपगमकुत्सने । ननामे ऽति नमेर् लिटि । क्वचित् तु प्रणत इत्य् अत्र प्रीत इति पाठस् तत्र सन्तुष्ट इत्य् अर्थः । प्रययौ सार्धम् बलेन नाम नलस्य इति पाठे नलस्य बलेन सैन्येन सार्धं समम् प्रययौ इत्य् अर्थः ॥४४॥

मुदम् इति । आमुक्तेन बद्धकवचेन त्यक्तेन वा अमुना पुष्करेण सह मुदम् प्राप लेभे । महात्मनाम् महाशयानाम् उक्तेन वचनेन विघट्टनामुक्तेन विघट्टना वियोगम् तेन मुक्तेन त्यक्तेन वियोगहीनेन । धृतनानामुक्तेन धृताः नानामुक्ताः मौक्तिकं येन तादृशेन नलेन राज्यं राष्ट्रम् प्राशासि प्रकर्षेण शिष्टं रक्षितम् । तदनन्तरं सकवचेन पुष्करेण सह हर्षं लेभे महात्मनां वाक्येन निजराज्यं वियोगहीनेना ऽनुशिष्टं नलेने ऽति भावः । मुत् प्रीतिः । आमुक्ताः प्रतिमुक्ताश् च पिनद्धम् चा ऽपिनद्धवत् । शासु अनुशिष्टाव् इत्य अस्य चिणि लुङि प्राशासी ऽति । उक्तम् भाषितम् उदितम् ॥४५॥

अरी ऽति । अस्य नलस्या ऽरिसंहतिः शत्रुपङ्क्तिः शत्रुसमूहो वनेषु अरण्येषु शुचां शोकानाम् पदं स्थानम् आपदं विपत्तिम् आपत् लेभे । कीदृशी । अमा निःश्रीका । एवम् अपद्मा अपदा स्थानरहिता मा लक्ष्मीर् यस्याः सा अस्थिरलक्ष्मीका इत्य् अर्थः । यद्वा । अपगता द्मा यस्याः सा इत्य् अर्थः । यतमायतमाय । यता गता माया कापट्यं यस्य स यतमायः अतिशयेन यतमायः यतमायतमः तस्मै जनाय सुखदं तं नलम् मा राज्यलक्ष्मीर् आयत आगता । यथै ऽव तादृशाय जनाय सुखदं हरिं कृष्णाम् मा ऽऽयाति तथे ऽत्य् अर्थः । यद्वा । यतम् इति भिन्नम् पदं यतं नियतचित्तं तम् । आयतमाय श्रेष्ठलाभाय आयत । यद्वा । आयतमाय अतिशयधनागमाय यतं तम् आयते ऽत्य् अर्थः । नलस्य शत्रुर् वने वसन् दुःखितो बभूव । निर्व्याजलोकसुखदं तं नलं लक्ष्मीर् आगतवती

सुखदं च पद्मे 'व जनाय हरिं यतमायतमाय तम् आयत मा ॥४६॥
नलेन पूर्यू अतायत यतायता पुरे 'व सा ।
सदा 'यम् उन्महा महामहाम् अहास्त सम्पदम् ॥४७॥

इति श्रीकालिदासकृते नलोदये सत्काव्ये चतुर्थोच्छ्वासः

॥ समाप्तश् चा 'यं ग्रन्थः ॥

॥ ४ ॥

'ति भावः । आयते 'त्य् अय गताव् इत्य् अस्य लङि । इन्दिरा लोकमाता मा । पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु । विपञ्च्यां विपदापदी । यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिपिकभेकेषु हरिर् ना कपिले त्रिषु ॥४६॥

नलेने 'ति । अथा 'शीर्वादव्याजेन नलोदयकाव्यसमाप्तिं सूचयति । नलेन नैषधेन सा पुरी स्वीया नगरी पुरे 'व पूर्वम् इव अतायत विस्तारिता । कीदृशी पुरी । अयतायता अयः शुभदैवम् । नलस्ये 'ति शेषः । तस्य भावो ऽयता तया आयता विशाला । यदा राज्ञो नलस्य शुभदैवम् अभूत् तदा यथा पूर्वं स्वनगरी विशाला 'भूद् इति भावः । यद्वा कीदृशेन नलेन । अयतायता अयेन शुभदैवेन तायति पालयति देवब्राह्मणादीन् इति शेषः अयतायन् तेन । यद्वा अयं तायति विस्तारयति तेन सर्वदा स्वशुभशंसकेन । ताय सन्तानपालनयोर् इत्य् अस्मात् कर्तरि शता । यद्वा अयो विद्यते यस्या 'सौ अयः अर्शआदिभ्यो ऽजित्यच् । तस्य भावो ऽयता शुभदैववत्त्वं ताम् एति प्राप्नोती 'त्य् अयतायन् तेन । इण् गतौ कर्तरि शतरि 'णो यण् इति यण् । अयं नलः उन्महा उद्गततेजाः सदा सर्वकालं सम्पदं लक्ष्मीम् अहास्त प्राप । कीदृशीं सम्पदम् । महामहाम् । महान्तो महा उत्सवाः यस्यां सा ताम् । सदै 'वो 'त्सवपरिपूर्णां सम्पदं लेभे इति भावः । अतायते 'ति तनु विस्तारे इत्य् अस्माद् धातोः कर्मणि लङि । आत्मनेपदेतपरे यकि च कृते तनोतेर् यकी 'ति विकल्पेनात्वे च रूपम् । अहास्ते 'ति । ओहाङ् गतौ इत्य् अस्माद् ये गत्यर्थास् ते प्राप्त्यर्था ज्ञानार्थाश् चे 'ति वचनेन प्राप्त्यर्थात् लुङि । आत्मनेपदेतपरे सिचि कृते रूपम् । पूरू यते 'ति दीर्घपाठे पूः पुरी यता प्राप्ता

कथम्भूता आयता विशाले 'त्य् अर्थः । पूः स्त्री पुरी नगर्यौ वा इत्य् अमरः ॥४७॥

इतो 'ति । इति समाप्तौ कालिदासे 'ति कविनामकथनम् । सत्काव्य इति महाकाव्यभिन्नत्वसूचनम् । उच्छ्वासः श्वाससाध्यः परिच्छेदः समाप्त इत्य् अर्थः ।

मिश्रानन्दकरस् त्व् आसीन् महोपाध्यायलक्षितः ।
पण्यग्रामसभाऽऽसेता यष्टा वाणीमयः सुधीः ॥१॥
वेदेने 'व विधिं कविं नयकृतैस् तर्केण वाचस्पतिम्
वेदान्तेन शिवम् मनुं स्मृतिभरैर् ज्योतिश्चयैर् भास्करम् ।
व्याकृत्येन फणाधरं क्षितिधरं नागाधिपं छन्दसा
धर्मो यस्य विजेतुम् अक्षतिपरं साङ्ख्येन चार्वाकपम् ॥२॥
तत्सूनुः सुकृती क्षितीश्वरकृपापात्रः सुहृत्पालकः
नानाशास्त्ररतो महापदयुतोपाध्यायसञ्ज्ञान्वितः ।
सत्तर्कायतकाननोद्यतबलह्लादीन्द्रदन्ता बल-
श्रेणीमर्दनचातुरी चणहरिर् विद्याकरो मैथिलः ॥३॥
तस्या 'त्मजो ऽभूद् विबुधाग्रगन्ता प्रज्ञाकरः सज्जनतापहन्ता
गुणालयः श्रीशपदानुमन्ता शास्त्रेषु दक्षः कुधियां नियन्ता ॥४॥
स्वल्पेन वयसा तेन कृता टीकासुबोधिनी ।
पूर्वाचार्यकृतीर् वीक्ष्य सुधियाम पश्यताम् मुदे ॥५॥

इति मैथिलश्रीप्रज्ञाकरमिश्रप्रणीतायां नलोदयकाव्यटीकायां सुबोधिन्यां चतुर्थ उच्छ्वासः ॥

॥ समाप्ते 'यं सुबोधिनीटीका ॥

NALODAYI Cantus I.

V. 1. O cor, nunquam cedas a Iâdavo, *qui est* criminis-silvae difficilis-appropinquatu ignis, e hostium-turbâ pater *veluti* amore servans trimundum.

V. 2. Qui nascebatur vir a bubulcâ, qui lustravit pastorum-mulierum-oculis haustus, a quo terra servata, qui ab isto Canso odium quidem nec tamen iniuriam expertus *est.*

V. 3. In cuius-hostibus perditi *sunt* honores-*et*-constantia, cuius-emissum vehiculum splendebat, et cui venerationem-exhibentes, bona-nomina-legentes, non erunt vitae-obnoxii.

V. 4. A quo homines in vituperio-*et*-laude-aequi salutem accipiunt, uti etiam apum-examen fluidae-aquae-cibum *accipit* ab elephanto, mundusque semper conservationis-spei-expers Danavorum mortem.

V. 1. Schol. सदा ad अवतः refert: a *semper servante.*

